Another copy of the *Līlāvatī* or *Gaṇitapāṭī* of the *Siddhāntaśiromaṇi*, differing somewhat in details from the preceding MSS., and agreeing more with the following Bengalī MS.

Marginal notes have been added in the first half of the MS. [GAIKAWAR.]

2802.

1493. Foll. 21; size 15¾ in. by 6¾ in.; modern Bengalī handwriting; eight lines in a page.

Another copy of the *Līlāvatī*, omitting the last two chapters. [H. T. COLEBROOKE.]

2803.

1049. Foll. 30; size 10¾ in. by 4¾ in.; modern Bengalī handwriting; six lines in a page.

Another copy of *Bhāskara's Līlāvatī*, likewise imperfect. It breaks off shortly after the beginning of the last chapter but one.

[H. T. COLEBROOKE.]

2804.

1807. Foll. 90; size 12½ in. by 6½ in.; fairly good Devanāgarī writing of 1813 A.D.; thirteen lines in a page.

Gaṇitāmṛitalaharī Līlāvatīvṛitti, a commentary on the *Līlāvatī*, composed, in 1338 A.D. (?), by *Rāmakṛishṇa*, son of *Lakshmaṇa*, grandson of *Nṛisiṃhadeva*, a pupil of *Somanātha*, who was a native of Jalapura on the Sahyādri range, or Western Ghauts.

It begins:

नृसिंहपादपंकजं नमामि सिद्धिदायकं ।
गुरोश्च पादपंकजं भजामि शास्त्रकारणम् ॥ १ ॥
यदीयं यद्धामं किमपि जगतां संभवकरं
खवायुस्थं वह्निजलकणमहाभूधरगतम् ।
स्वभक्तानां भव्यं दिशति निजसायुज्यविभवं
सदा वंदे मे तद्धृ[द]यकमले संततगतम् ॥ २ ॥
सह्याद्रेर्निकटस्थिते जलपुरे जातः कथांवोदरे(!)
मच्छे(?मर्त्ये)द्रांघ्रियुगप्रसादमुदितः श्रीसोमनाथः सुधीः ।
तत्पादांबुजसेवनैकनिरतः श्रीरामकृष्णाभिधः
कुर्वे सद्गणिते हि भास्करकृते टीकां मुदे तद्विदाम् ॥ ३ ॥

त्रुट्यादिप्रलयांतकालकलना मानप्रभेदक्रमाच्चाराश्च द्युसदां द्विधा च गणितमित्याद्युक्तक्रमेण सिद्धांतशिरोमणिकर्तृभास्कराचार्यैः °ज्ञानीते । प्रीतिं भक्तजनस्य °

It ends: इति भास्करीयलीलावतीसंज्ञापाट्यध्यायः समाप्तः ॥

दैवज्ञवर्यनुहरे(? नृहरेः) सुतलक्ष्मणस्य
श्रीरामकृष्ण इति नामतयास्ति पुत्रः ।
श्रीसोमनाथभजनात्परिलब्धबोधः
श्रीविश्वसूर्यगुरुभक्तिरतो नितांतं ॥ १ ॥

सो ऽयं भास्करप्रोक्तपाटिगणिते सद्युक्तियुक्ते ऽकरोट्
टीकां सद्गणितामृतस्य लहरीं तस्यार्थबोधप्रदां ।
नंदाश्वर्तुमि१२६०मामिति(!) शकगते वर्षे सहस्यासिते
पक्षे सर्वतिथौ सदाशिवपदार्चार्थं हि भूयात्सदा ॥

इति श्रीनृसिंह[दैवज्ञात्मजलक्ष्मण]दैवज्ञसुतसिद्धांतविद्दैवज्ञरामकृष्णविरचिता लीलावतीवृत्तिर्गणितामृतलहरी संपूर्णा ॥ संवत् १८७० रावर्षे शाके १७३५ प्रवर्तमाने मासोत्ममासे(?मासोत्तममासे) चैत्रमासे कृष्णपक्षे पंचम्यां तिथौ शुक्रवासरे ॥

Cp. the same author's commentary (*Bījaprabodha*) on the *Bījagaṇita*, no. 2832; the colophon of which shows what has been omitted by the present copyist.

[DR. JOHN TAYLOR.]

2805.

1895. Foll. 96; size $6\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; good, clear Devanāgarī writing of 1814 A.D.; ten lines in a page.

A fragment of *Gaṅgādhara's Gaṇitāmṛitasāgarī*, followed by the concluding portion of *Rāmakṛishṇa's Gaṇitāmṛitalaharī*.

The last colophon of the former work occurs on fol. 47*b*: इति भास्करीयलीलावत्या विवरणे गणकगंगाधरविरचिते श्रेढीव्यवहारविवृतिः समाप्ता ॥ (MS. 728, fol. 32*b*), while the first colophon of the latter commentary is found on fol. 73*a*: इति श्रीभास्करीयलीलावतीटीकायां सिद्धांतदैवज्ञरामकृष्णविरचितायां गणितामृतलहरीसंज्ञायां क्षेत्रव्यवहारः ॥ and the junction of the two commentaries occurring on fol. 56*b*, corresponding to fol. 56*a* of MS. 1807, from which indeed the latter portion of the volume is derived, containing as it does the same copyist's colophon with the Saṃvat and Śaka dates; and the special date Śaka 1736 added thereto.

[DR. JOHN TAYLOR.]

2806.

728. Foll. 61; size $12\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; good, modern Bengalī handwriting; 13 lines in a page.

Gaṇitāmṛitasāgarī, or *Amṛitasāgarī*, (*Līlāvatīpāṭīkāṭīkā*), a commentary on *Bhāskarācārya's Līlāvatī*, by *Gaṅgādhara*, son of *Govardhana*, grandson of *Divākara* of Jambūsaronagara, and younger brother of *Lakshmīdhara* and *Vishṇu Paṇḍita* (author of the *Gaṇitasāra*).

It begins:

आदित्यं जगदुद्भवस्थितिलयव्यापारपारंगमं [1]
धीरा ब्रह्म षडूर्मिदोषरहितं पश्यन्ति यं तद्गतं ।
भक्तानां च मनोरथार्थफलदं क्लेशत्रयच्छेदकं
गीतं सत्स्तुतिभिः सदोदयमहं वन्दे जगद्भास्करं ॥ १ ॥

गुरोरङ्घ्रिपद्मद्वयं च प्रणौमि
प्रसादोन्मुखं [2] सिंधुरास्यं गणेशं ।
जगद्बोधरूपां मतिं विश्वमायां
गिरां चेश्वरीं ब्रह्मपुत्रीं प्रसन्नां ॥ २ ॥

महेश्वरो ऽभूच्च महेश्वरस्य
प्रसादलब्धोदयबुद्धिवृद्धिः ।
तस्यात्मजो भास्करलब्धबोधः
श्रीभास्कराचार्य इति प्रसिद्धः ॥ ३ ॥

वेदोपवेदवेदाङ्गवेत्ता विश्वैककोविदः ।
गणितज्ञगणाग्रे यो गणनायां द्विजोत्तमः ॥ ४ ॥

ब्रह्मादिर्जगदादिकालकलना पञ्चप्रकारा गतिः
खेटानां च सवासना च विनियज्ञोलप्रपञ्चस्थितिः ।
यन्त्राणि द्विविधं च यत्र गणितं तेन क्रमाद्विस्तृतं
सत्सिद्धान्तशिरोमणौ सुकविना श्रीभास्करेण स्फुटं ॥ ५ ॥

विष्णुस्वरूपं गणितं रहस्यं
व्यक्तं तथाव्यक्तमिति द्विधा यत् ।
गुरुप्रसादाभ्यसनैर्विदित्वा
मुच्येत धीमान्महतो ऽपि मोहात् ॥ ६ ॥

अव्यक्तं बीजभूतत्वाद् गणितं बीजसंज्ञितं ।
व्यक्तं च पाटीगणितं प्राहुर्गणितवित्तमाः ॥ ७ ॥

तत्र लीलावती नाम गणितोत्तमपाटिका ।
रचिता भास्करेणान्यपाटिकोत्तंसरूपिणी ॥ ८ ॥

---

[1] MS. 1895 reads: ०स्थितिविभुं भासां निधिं योगिनां; cf. Rāj. M.'s and Berl. MSS.

[2] Thus MS. 1895; प्रणम्य प्रसीदन्मुखं MS. 728.

श्रीयाज्ञवल्क्यमुनिवर्यकृतप्रतिष्ठं
जम्बूसरोनगरमस्ति सुतीर्थमर्म्यं ।
धीमांस्तु वात्सकुलजो ऽत्र दिवाकराभ्र-
ज्ञानो दिवाकर इति प्रथितो द्विजो ऽभूत् ॥ ९ ॥

तत्सूनुर्गणितश्रुतिस्मृतिपुराणज्ञो ऽग्रगण्यो विदां
श्रीगोवर्धनपादपद्मशरणं स्वान्तःपवित्रात्मवान् ।
सद्वृत्तः सुयशाः परोपकृतिकृद् दीने दयालुः कृती
श्रीगोवर्धनसंज्ञितो द्विजवरः ख्यातो ऽस्ति भूमण्डले॥१०॥

तत्सूनुरनुजो विष्णोर्धीमान्[1] लक्ष्मीधराद्बुधात् ।
गङ्गाधरकृपालब्धोदयो गङ्गाधराह्वयः ॥ ११ ॥

तेन ध्यातदिवाकरेण सुधिया[2] विद्वत्सु च प्रीतिदा
संदेहार्तिविनाशिनी गणकधीवृद्धिप्रदारभ्यते ।
श्रीगोवर्धननन्दनेन विमला लीलावतीपाटिका-
टीका चामृतसागरीति[3] सरला गङ्गाधरेण स्फुटा॥१२॥०

From a passage occurring on fol. 60*a* [अथा-ग्रयोगादित्यादि शको ये ४२ भाद्रपदसुदि १५ सुकेत(!) श्री-सूर्यसिद्धान्तशिरोमणौ संसाधितो ऽहर्गणः १२०६३६०९४१९७ कल्पे कुदिनानि १५७७९६४५०००० रविभागाः ४७२०००००००
अतः साधितः राश्यादिरवेर्भगणः०] Colebrooke supposes this commentary to have been composed about Śaka 1342 (A.D. 1420); but in a marginal note on that passage he remarks that the number (of days from the beginning of the *Kalpa*) in the text seems to be wrong.

It ends:

तेषां विशुद्धगुणवर्णविभूषिताङ्गी
शुद्धाखिलव्यवहृतिः खलु कण्ठसक्ता ।
लीलावती तु शरलोक्तिमुदा हरन्ति(?हरन्ती)
तेषां सदैव सुखसंपदुपैतु वृद्धिं ॥

इति श्रीगणकगङ्गाधरविरचितायाममृतसागर्यां लीलावती-विवृतिः समाप्ता ॥

Cf. Rāj. Mitra, Notices, iii., p. 243; Weber, Berlin Cat., nos. 831, 1739.

[H. T. Colebrooke.]

---

[1] वृत्तो धीमान् MS. 728.

[2] ध्यातदिवाकराम्रसुधिया MSS. 1895, Berl.

[3] ०पाटिका या चैकामृतसागरीति MS. 1895.

2807.

2278. Foll. 47 (paged 1-93); size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 24 lines in a page.

Gaṇitāmṛitasāgarī; apparently copied from the preceding MS. [Calcutta.]

2808.

1061b. Foll. 13; size 6¾ in. by 4¼ in.; legibly written, in Devanāgarī, about 1780 A.D.; 13 lines in a page.

A fragment of the same work; viz. the second chapter (*parikarmāshṭaka*), extending from fol. 4*b* to 12*a* of MS. 728.

[H. T. Colebrooke.]

2809.

115. Foll. 114; size 10 in. by 4¼ in.; fair Devanāgarī writing of the latter part of the last century; 10 or 11 lines in a page.

Gaṇitāmṛitakūpikā, a commentary on the *Līlāvatī,* composed, in Śaka 1463 (A.D. 1541), by *Sūryadāsa* or *Sūryakavi,* son of *Jñānarāja,* and grandson of *Nāganātha,* of the *Bhāradvājakula,* a resident of Pārthapura, near the confluence of the Godā and Vidarbhā.‡

It begins:

यः पीयूषमयूखशोभितशिरोदेशः सुरेशार्चितः
शेषाशीविषभूषणो मदगलद्दानाम्बुपूरप्रदः ।
कर्णान्दोलितचारुचामरमहम्मालाविलासोल्लसच्-
चित्तोन्मत्तमतंगतुंगवदनः पायादपायात्स वः ॥ १ ॥

---

* The Vidarbhā, according to Colebrooke, is the modern Wardhā; but as, on our maps, that river does not flow directly into the Godāvarī, but into the Prānhitā, the latter would seem here to be taken as forming the lower part of the Wardhā. No such name as Pārthapura is, however, given on our maps near the confluence of that river and the Godāvarī. Indeed, in our author's *Sūryaprakāśa* (no. 2823), this lower part of the river (resulting from the confluence of the Wardhā and the Pengangā) is called Maṅgalā-gaṅgā.

भृंगश्रेण्योव(? त)वेणी विलसति° ॥ २ ॥

अव्यक्तं गणितं सवासनतया व्याख्याय लीलावतीं
व्याख्यातुं विहितादरो ऽस्म्यहमथ व्यक्तोपपत्तिक्रमैः ।
श्रीमत्सुज्ञविधिज्ञपंडितवरज्ञानाधिराजात्मजः
स्वप्रज्ञापरिणामतः सुगणकः सूर्याभिधानः कविः ॥ ३ ॥

निर्मथ्य बीजगणितारवि(? णि)मात्मयत्नात्
सद्वासनामृतमवाप्तमिदं मया यत् ।
तत्संग्रहाय गणितार्णवकूपिकेयं(!)
टीका विरच्यत इहावनिदेवतुष्ट्यै ॥ ४ ॥ °

It ends :

अस्ति त्रस्तसमस्तदोषनिचयं गोदाविदर्भायुतेः
क्रोशेनोत्तरतः तदुत्तरतटे पार्थाभिधानं पुरं ।
तत्राभूद्गणकोत्तमः पृथुयशाः श्रीनागनाथाभिधो
भारद्वाजकुले सदैव परमाचारो द्विजन्माग्रणीः ॥ १ ॥

पुत्रस्तस्य कलाकलापकुशलः क्ष्मापालमालार्चितः
सौजन्यैकसुधाकरः क्षितितले सौभागभाग्यास्पदं ।
कीर्तिर्यस्य दिगंतरेषु विविधैर्व्या[ख्या]नसंख्यागमैर्
विख्याता ननु सत्कविर्विजयते श्रीज्ञानराजाभिधः ॥ २ ॥

तत्सूनुर्गणितार्णवप्रतरणेः सत्कर्णधारः सुधीश्
छंदोऽलंकृतिगीतशास्त्रनिपुणो वैदग्ध्यपारंगतः ।
सूर्यो दैवविदां मुदे रचितवान्व्यक्तस्य टीकामिमाम्
आचार्याः सदसद्विचारचतुराः पश्यंतु तुष्यंतु च ॥ ३ ॥

दुर्ज्ञेया गणितोपपत्तिरच° ॥ ४ ॥

आस्वादितापि विविधैरुपयाति वृद्धिं
व्यक्तादिपक्षयुगले ऽपि तनोति शोभां ।
पूर्णा कलाभिरत एव सुधांशुमूर्तेर्
आधिक्यमेति गणितामृतकूपिकेयं ॥ ५ ॥

परोपकारार्थमुदाहृतेन
मन्नाग्विलासेन रसोत्कटेन ।
शब्दाभिधं ब्रह्म यतः प्रवृत्तं
य(r. स) प्रीयतां यादवराजसिंहः ॥ ६ ॥

सदला त्रिसहस्री ३१०० स्यादनुष्टुभां ग्रंथसंमितिः शाके ।
त्रिरसपुरंदरगणिते गणितामृतकूपिका रचिता ॥ ७ ॥

व्याख्ये वासनयान्विते गणितयोर्लीलावतीबीजयोस्
तद्वच्छ्रीपतिपद्धतेश्च गणितं बीजं तरथेकं(r. तथैकं)
[व्यधात् ।
एकं ताजिकमच्युतार्थमपरं काव्यद्वयं प्रौढधीः
सूर्यो बोधसुधाकराख्यमकरोदध्यात्मशास्त्रे ऽष्टमं ॥ ८ ॥

The colophon, written by a different hand, runs: इति श्रीमत्सकलानवद्यविद्याविद्योतमानसानसगणितोपनिषद्रहस्याभिज्ञदैवज्ञपंडितज्ञानराजतनयपंडितसूर्यदासविरचिता गणितामृतकूपिका भास्करीयलीलावतीटीका संपूर्णा ॥

Besides the above-mentioned eight works of the author,—viz. the commentaries on *Līlāvatī* and *Bījagaṇita*, and on the *Śrīpatipaddhati* (and a *Bījagaṇita* of his own), a *Tājika*, two *Kāvyas* (probably the *Nṛisiṃha-campū* and *Rāmakṛishṇa-kāvya*), and the *Bodhasudhākara* on the *Adhyātmaśāstra* (?)—he (subsequently to 1541 A.D.) composed other works, for which see Aufrecht, Cat. Cat., sub *Sūryakavi.*

For the earlier ancestry of our author see no. 2901. [H. T. COLEBROOKE.]

2810.

2275. Foll. 90 (erroneously counted 92); size 4to, 13 in. by 10 in.; good modern Devanāgarī writing; 23 lines in a page.

The same work. A reproduction of the preceding MS. [CALCUTTA.]

2811.

1012. Foll. 105; size 11¾ in. by 4½ in.; fairly good Bengalī handwriting of 1658 A.D.; ten lines in a page.

Buddhivilāsinī, a commentary on the *Līlāvatī*, composed, in Śaka 1467 (1545 A.D.), by *Gaṇeśa*, son of *Keśava*, of Nandigrāma.

It begins :

श्रीविद्याधरसेवितो द्विजपतिश्रीवर्धनो[1] यस्त्रयी-
मूर्तिः स्वोन्नमनात्सदा सुमनसामानन्दपूरप्रदः ।
कव्याचार्यविदो[2] ऽपि यत्पदमिताः[स्युः] स्वप्रकाशा अपि
धुत्पूना जयति क्षितौ खगपतिः[3] श्रीकेशवः सद्गुरुः ॥

अथ त्रयी वाची ॥

शरजाव इवानीश शनीरासुरधामश[4] ।
शमधाम वै पापाश शपाप हृदिनावश[5] ॥

अष्टदलपद्मबन्धश्लोकः ॥

श्रीभास्करोक्तवचसामपि संस्फुटानां
व्याख्याविशेषकथनेन न चास्ति चित्रं ।
अत्रोपपत्तिकथने ऽखिलसारभूते
पश्यन्तु सुज्ञगणका मम बुद्धिचित्रं ॥

व्यक्ते ऽव्यक्तसंज्ञे यदुदितमखिलं नोपपत्तिं विना तच्चेद्
विभ्रान्ता नो ऽत्र ते तां सुगणकसदसि प्रौढतां नैति [चार्यं(?) ।

प्रत्यक्षं दृश्यते सा करतलकलितादर्शवत्सुप्रसन्ना
तस्मादग्र्योपपत्तिं निगदितुमखिलामुत्सहे बुद्धिवृद्ध्यै ॥

नानागमार्थनिपुणः प्रथितो धरायां
श्रीकेशवो ऽस्य तनयेन गणेशनाम्ना ।
लीलावतीविवृतिरग्रिमबुद्धितुष्ट्यै
प्रारभ्यते विमलबुद्धिविलासिनीयं ॥

अत्रोच्चावचदैवज्ञा दृष्ट्वा व्याख्यानकौशलं ।
तुष्यन्तु मतिमन्तस्तु वासनावचनामृते ॥

Having explained his first two mysterious stanzas—the first in three different ways—he proceeds to explain his text. The first leaf of the MS. having suffered considerably through wear, a somewhat later hand has supplied a fresh copy of the first page on two leaves, the first of which has been inserted in front (in consequence of which the original pagination of the leaves was afterwards changed), and the second at the end of the volume.

[1] द्विजपतयो द्विजश्रेष्ठाः॰ तान् श्रिया लक्ष्म्या वर्धयतीति ॥॰ द्विजाः पक्षिणस्तेषां पतिर्गरुडः। तस्य श्रीस्तां वर्धयतीति तद्वा ॥ comm.

[2] कवयः प्रसिद्धाः। आचार्यविदो ऽध्यापकाः शास्त्राभिज्ञाः। comm.

[3] खगः श्रीसूर्यः॰। सूर्योपासक इत्यर्थः। comm.

[4] शरेषु बाणवृक्षेषु जातः कार्त्तिकेयः। तमवति पालयति प्रीणयति ॥ शनिं शनिपीडां ईरयति निराकरोतीति शनीरा ॥ असुरस्थानं श्यति तक्ष्णोतीति॰ ॥

[5] शमः शान्तत्वं योगादित्वस्य धाम निकेतनं ॥॰ शापाः(?शपः) ह्रेष्टारः तान् पाति न रक्षतीति शपापः ॥ हृदि जातः हृदिजः मनोभवस्तमवमत्यच(?॰त्याय) श्यति तक्ष्णोतीति हृदिजावजः ॥

After another stanza to *Keśava* (भुवनवदवरिष्ठ॰), which he again thinks it necessary to explain, the author concludes his work as follows:

दृष्ट्वा केचिदिहोपपत्तिममलां तुष्यन्तु ये सज्जनाः
केचित् साकचितान्विता विशेषवचना(?विरचना) [व्याख्यादिकं केचन ।
केचिद्विब्रुवते ऽत्र किंचिदपि नापूर्वं वचो ऽस्तीति ये
तुष्यन्तु स्वगिरैरतिपि(?) निखिलं पश्यन्तु सन्तः समं ॥

श्रीमत्सज्जनधामवृन्दरुचिरे क्षाराम्बुधेः प्राक्तटे*
नन्दिग्राम इहावसद् द्विजवरः श्रीकेशवो ऽस्यात्मजः ।
तत्पादाब्जयुगाप्तशास्त्रविभवः श्रीमद्गणेशः कृती
नानायुक्तिमतीमिमां हि कृतवान् लीलावतीव्याहृतिं ॥

श्रीशालिवाहनशके ऽद्रिरसेन्द्रतुल्ये १४६७
विश्वावसौ शरदि मासि मधौ सिताजे(!) ।
लीलावतीसुविवृतिं कृतवान् गणेशः
श्रीकेशविर्गणकवर्यकुलावतंसः ॥

श्रीकालागमाचार्यवर्यश्रीकेशवदैवज्ञसुतश्रीगणेशदैवज्ञविरचिता लीलावतीटीका बुद्धिविलासिनी समाप्ता ॥ ॰

वारः शक्रयुतस्तिथिस्त्रिगुणिता वेदोत्थता वत्सरो
मासस्तस्य दलं च तद्युतिदलं खाष्टाहतं षष्टियुक् ।
शाकः स्यान्नगभूशतप्रपतितो नक्षत्रयोगाहतिः
स्याद् व्यूनाङ्ककृता भयो गजमितिर्नवाङ्कसप्तेन्दवः ॥ [१७६९ ॥

शके खनागेषुमहीमिते (1580) ऽङ्के लीलावतीबुद्धिविलासिनीयं। श्रीगङ्गारामशर्मणा लिखीतं नारसिंहिना सौरम्भावलिखे(!) ॥ श्रीरामचन्द्रचक्रवर्तीणः स्वकीयपुस्तकमिदं ॥

Cf. Colebrooke, Misc. Ess., ii., p. 451.

[H. T. Colebrooke.]

2812.

89b. Foll. 100; size 10 in. by 4½; fairly good Devanāgarī writing of 1797 A.D.; ten lines in a page.

* That is, on the shore to the east of the (western) ocean; for we know from the *Grahalāghava* that Nandigrāma was situated in the Aparânta country in the west (the northern Konkan, according to Prof. Bhandarkar, Rep. 1882-3, p. 29).

Buddhivilāsinī. This MS. is written in the same hand as the text of the *Līlāvatī* contained in the same volume.

Whether the following verse at the end refers to the copyist of the present or a former MS. does not appear:

शांडिल्याख्यकुले स्वकीर्तिविमले श्रीमल्लिनाथो ऽभवत्
तस्यासीत्तनयः कृतातिविनयः श्रीत्र्यंबकाख्यो महान्।
ज्योतिःशास्त्रविचारसारचतुरो गोपालनामाकरो
बुद्धीनां जगदंबिकांघ्रिकमलद्वंद्वातिसेवापरः ॥

संवत् १८५४ वैशाखमासे शुक्लपक्षे अष्टम्यां गुरुवारे ॥

[H. T. COLEBROOKE.]

2813.

2279. Foll. 96; size 4to, 13 in. by 9¾ in.; good, clear Devanāgarī writing of 1812 A.D.; 23 lines in a page.

The same work. A reproduction of the preceding MS.

[CALCUTTA.]

2814.

133. Foll. 89; size 9¾ in. by 4¾ in.; good, clear, modern Devanāgarī writing; eleven lines in a page.

Mitabhāshiṇī, a commentary (*vivṛiti*) on *Bhāskara's Līlāvatī,* by *Gaṇakasārvabhauma Raṅganātha,* son of *Nṛisiṃha daivajña,* and brother of *Divākara* and *Kamalākara.*

It begins:

यत्पादपद्मभजनादतिमंदबुद्धिर्
यन्मादृशो ऽपि सुतरां सुमतिः प्रजातः।
वंदे तमीशभजनाप्तमतिप्रसारं
श्रीमल्लिवं गणकवर्यकुलावतंसं ॥ १ ॥

सरस्वती यद्रसनाग्रगा नरी-
नृतीति तं पंडितमंडनायितम्।
कलाकलापाकलनाकुलानिधिं
गुरुं गुरूणां कलये दिवाकरम् ॥ २ ॥

गुणमंडितपंडिताग्रणीं विधिविन्मंडलमंडनायितम्।
दधतं श्रियमुत्तमां गुरुं सततश्रीकमलाकरं भजे ॥ ३ ॥

या भास्करोक्ता चतुरोक्तिशालिनी
लीलावती तत्र विलोकयंतु।
मद्भासनाचारुविचारचातुरी-
चमत्कृतिं चारुविचारवंतः ॥ ४ ॥

या ऽव्यक्तरीत्या यदलेखि पूर्वैर्
युक्तिर्न युक्तात्र नयोऽस्तु भेदात्(?)।
व्यक्तानवद्या हृदये ऽत्र हृद्या
विद्यावतां तोषकरी भवद्भिः ॥ ५ ॥

इत्थं हि सच्छिष्यगणैर्विशिष्य
संप्रार्थितो ऽहं कृतिरंगनाथः।
तद्भामना[चारुवि]चारसारं
व्याख्यावतारं प्रकटीकरिष्ये ॥ ६ ॥

श्रीभास्करकृतेर्व्याख्यामाख्यातुमपि न क्षमः।
तथाप्यनुग्रहाद्भानोः करोमि मितभाषिणीम् ॥

अथ विशिष्टशिष्टाचारपरिप्राप्तं मंगलमाचरन् चिकीर्षितं प्रतिजानीते। प्रीतिमिति० ॥

It ends:

दैवज्ञवर्यगणसेव्यनृसिंहजन्म-
श्रीरंगनाथगणकेन विनिर्मिते ऽस्मिन्।
लीलावतीविवरणे बहुयुक्तियुक्ते
यातोंकपाश इति चारुविधानलभ्यः ॥

इति श्रीसकलगणकसार्वभौमश्रीमन्नृसिंहदैवज्ञसुतरंगनाथकृतायां लीलावतीविवृतौ मितभाषिणीसमाख्यायां अंकपाशाध्यायः समाप्तिमगमत् ॥

The author quotes his brother *Kamalākara* (foll. 27*b*, 36*b*, 37*b*, 41*b*), his father *Nṛisiṃha* (foll. 50*a*, 53*a*), *Padmanābha* (fol. 67*b*), *Śrīdhara* (foll. 47*b*, 50*a*, 67*b*); and the works *Gaṇitakaumudī* (foll. 47*b*, 49*a*, 50*a*), *Pāṭīratna* (foll. 44*a*, 47*b*), *Śriṅgāratilaka* (foll. 42*a*, 53*a*).

Colebrooke, Misc. Ess., ii., p. 452, puts the author's date about the middle of the 16th century of the Śaka era (*c.* 1630 A.D.). His brother *Kamalākara,* indeed, wrote his *Siddhāntatattvaviveka* (no. 2890-91) in 1658 A.D.

[H. T. COLEBROOKE.]

2815.

2276. Foll. 40; size 4to, 13 in. by 10 in.; fair, modern Devanāgarī writing; 26 lines in a page.

Mitabhāshiṇī, transcribed from the preceding MS. [CALCUTTA.]

2816.

1742. Foll. 59 (one of which, 53, seems to be missing); size 9¼ in. by 4 in.; legibly written in Devanāgarī, about 1750 A.D.; 13 lines in a page.

Manorañjana, a commentary (*vivaraṇa*) on the *Līlāvatī*, by *Rāmakṛishṇa Deva*, son of *Sadāśiva Āpadeva* and *Bhavānī*, grandson of *Śrīpati Deva*, a resident of Devālayapura, great-grandson of *Nīlakaṇṭha Deva*, and great-great-grandson of *Gopāla Deva*, of the *Ātreya-gotra*.

It begins: प्रीतिमिति । अहं भास्कराचार्यः ०

It ends:

लीलावती सुगहना शक्या नैव कथंचन ।
उपायेन वशीकर्तुमिति सर्वत्र निश्चितं ॥ १ ॥
आपदेवसुतत्वेन धृत्वोभयसमांशकं ।
मनोरंजनमात्रेण रामकृष्णस्तथाकरोत् ॥ २ ॥

आत्रेयगोत्रे सुतरां पवित्रे
गोपालदेवो विबुधादिदेवः ।
अभूद्भूमिः प्रतिवादिजन्मनां
पराभवानां भुवनैकमान्यः ॥ ३ ॥

तस्माद्भूच्छास्त्रविदां वरिष्ठः
श्रीनीलकंठो ऽर्चितनीलकंठः ।
तस्माद्भूत्पंडितमंडलीडितः
श्रीश्रीपतिः श्रीपतिसक्तचेताः ॥ ४ ॥

शेषपन्नगगरी रुचिरैकवक्त्रा
तर्कनीतिरदनोपनिषत्सुवक्षाः ।
ज्योतिषामयननेत्रमनोऽभिरामा
छंदसां चितिपदा सकलागमांगी ॥ ५ ॥
जिह्वाप्रांगणरंगे विद्याविद्याधरी यस्य ।
नृत्यति नानाभावान्विदुषामुपदर्शयंतीव ॥ ६ ॥

सदाशिवो ऽस्ति तत्पुत्रः समर्चितसदाशिवः ।
शब्दधर्मनयाभिज्ञ आपदेवापराभिधः ॥ ७ ॥
तदंगजन्मना रामकृष्णदेवेन निर्मितं ।
लीलावतीविवरणं मनोरंजनसंज्ञकं ॥ ८ ॥

संप्रार्थये ऽहं सततं कृतांजलिर्
निर्मे[त्स]रा ये ऽत्र वसंति लोके ।
संशोध्य संशोध्य कृतिं मदीयां
विपश्चितस्ते परिशीलयंतु ॥ ९ ॥

इति श्रीमद्विद्वन्मुकुटमाणिक्यपदवाक्यप्रमाणपारावारीणधुरीण-श्रीमन्नीलकंठदेवात्मजसकलविद्यानिधानश्रीमच्छ्रीपतिदेवात्मज-श्रीमत्सदाशिवदेवापराभिधानश्रीमदापदेवसुतभवानीगर्भजराम-कृष्णदेवनिर्मिते लीलावतीविवरणे मनोरंजनाभिधे अंकपाशाध्यायः ॥ समाप्तश्चायं ग्रंथः ॥

देवालयपुरावासिदेवश्रीपतिजन्मनः ।
आपदेवस्य विदुषो जगज्ज्ञानातु पुस्तकम् ॥

The MS. from which this verse was copied would thus seem to have been the very one which the author presented to his father. Colebrooke, Misc. Ess., ii., p. 453–4, remarks that this commentary "bears no date, nor any indication whatsoever of the period when the author wrote." As regards the author's grandfather, *Śrīpati*, it may be remarked that the *Daivajñavallabha* (see Cat. Cat.) is ascribed either to *Śrīpati* or to (? his father) *Nīlakaṇṭha*. [H. T. COLEBROOKE.]

2817.

2277. Foll. 46; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 25 lines in a page.

The same work; apparently transcribed from the preceding MS. [CALCUTTA.]

2818.

1976. Foll. 88; size 8¾ in. by 3½ in.; clear, modern Devanāgarī writing; ten lines in a page.

Pāṭīvyākhyāna, also called *Pāṭīgaṇita* or *Līlāvatyudāharaṇa*, a practical commentary on the *Līlāvatī*, consisting chiefly of a series of examples in illustration of its rules; by *Paṇḍita Vīreśvara*.

It begins: श्रीवरदमूर्तये नमः ॥ श्रीगुरुमूर्तये नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीढुंढिराजमीडे भूयः परिवारसंयुतं ब्रह्म ॥

पाटीपुटत्वं न विनाधिगंतुं
बीजं समर्थो विबुधोऽपि कश्चित् ।
उदाहृतिं नास्ति विना तदस्मात्
संक्षेपतस्तां कथयामि तावत् ॥ १ ॥

विशिष्टविशिष्टाचारपरिप्राप्तं मंगलमाचरन् चिकीर्षितं प्रतिजानीते । प्रीतिमिति । अहं भास्कराचार्यनिर्दूषणगणितस्य पाटीं परिपाटीं व्यक्तगणितमिति यावत् । ०

The MS. is incomplete: it breaks off abruptly in the *Kuṭṭakādhyāya*; the *sthira-kuṭṭaka* beginning on fol. 85*b*. The author quotes a *Pāṭīratna* (fol. 6*a*, 48*a*), besides the *Gaṇitakaumudī*, *Lakshmīdāsa-miśra*, and *Śrīdharācārya*. [Dr. John Taylor.]

2819.

871b. Foll. 36; size 10 in. by 4½ in.; good, small Bengalī handwriting of 1790 A.D.; 10–12 lines in a page.

Bījagaṇita, being the second, or algebraic, section of *Bhāskarācārya's Siddhāntaśiromaṇi*, acknowledged by the author to be founded on the works of *Brahmagupta*, *Śrīdhara*, and *Padmanābha* on the same subject.

Editions of the text were published at Calcutta in 1834 and 1853; and an English translation, by H. T. Colebrooke, in his "Algebra with Arithmetic and Mensuration," London, 1817.

The MS. was copied, by order of Colebrooke Sāhib, by *mahopādhyāya Citrapati-śarman*. [H. T. Colebrooke.]

2820.

871c. Foll. 25; size 10¼ in. by 4 in.; legibly written, in Devanāgarī, about 1730 A.D.; 14–16 lines in a page.

Another copy of *Bhāskarācārya's Bījagaṇita*, imperfect at the end.

The last leaf, numbered 26, and dated Benares (*vāṇārasī*) Saṃvat 1841, Śaka 1706, is in a different hand from the rest, and follows upon fol. 24, leaving a gap of one leaf in the text. Fol. 19 has likewise been supplied by a more modern hand.

This MS. is followed by two more leaves in Bengalī writing, containing fragments of some astronomical treatise.

[H. T. Colebrooke.]

2821.

611a. Foll. 51; size 10 in. by 4½ in.; good, clear Devanāgarī writing of 1704 A.D.; nine lines in a page.

Bhāskarācārya's Bījagaṇita.

Dated: संवत् १७६१ वरषे अगहनसूदिनवमी ९ भूक्रवासरे प्रयागमध्य अनुपसोह्यलेखक इदं पुस्तकं लीख्यते ॥

[H. T. Colebrooke.]

2822.

2293. Foll. 37; size 4to, 13 in. by 10 in.; fair Devanāgarī writing of 1813 A.D.; 23 lines in a page.

Another MS. of the *Bījagaṇita*, copied from the preceding MS. [Calcutta.]

2823.

1533a. Foll. 73; size, royal 8vo, 9 in. by 6¼ in.; good, modern Devanāgarī writing; 26-28 lines in a page.

Sūryaprakāśa Bījavyākhyā, a commentary on *Bhāskara's Bījagaṇita*, composed, in 1541 A.D.,

at the age of 31, by *Sūryadāsa*, son of *Jñānarāja*, and grandson of *Nāganātha*, of Pārthapura, near the confluence of the Godā (Godāvarī) and Maṅgalāgaṅgā (Vidarbhā, Colebr.).

It begins:

भाले प्रालेयरश्मिः सुनयनयुगलोन्मीलने सिद्धयो ऽष्टौ
कंठे श्रीकंठपीठे स्फुरति फणिफणासन्मणीनां* [प्रकाशः ।
आस्ते ब्रह्मादिमौलिस्थलमधुपगणो यत्पदांभोजपीठ-
प्रांते ऽनंतप्रभावं गणपतिरिति यज्जातिरव्यादिहा- [स्मान् ॥ १ ॥

[यावत्कालकनीलवर्णरुचिरं पीतं सितं लोहितं
वासो हासकराधरैरिव गुणं हारप्रवर्गं दधत् ।
सन्मूलं समशोधनैरधिगतव्यक्ताभिधं वा धिया
वेद्यं योगविशेषतः किमपि तत्कृणोति बीजं भजे ॥ २ ॥ [om. A.]

यत्पादांबुरुहप्रसादकणिकासंजातबोधादहं
पाटीकुट्टकबीजतंत्रगहनाकूपारपारंगमः(°गतः B.C.)।
छंदोऽलंकृतिकाव्यनाटकमहासंगीतशास्त्रार्थवित्
तं वंदे निजतातमुत्तमगुणं श्रीज्ञानराजं गुरुं ॥ ३ ॥

चक्रे चक्रविहंगयोरिव युतिं निघ्नन्विमोहक्षयं
विश्लेषे गणितार्थयोः कविमुखांभोजं समुल्लासयन् ।
शृंगारादिरसानुसक्तविबुधेंद्राणामसौ पूरयन्
शश्वद्विष्णुपदस्थिरो विजयते सद्बोधसूर्योदयः ॥ ४ ॥

स्फुरद्बीजांभोधौ विविधरचनागाधसलिले
तितीर्षूणां मा भूदयमतिमतीनां(भूदपगतम° B., C.)
विमुग्धानामित्यादृतसदयचेताः परिमिताम् [श्रमभरः ।
इमां व्याख्यानावं सपदि रचये सूर्यगणकः ॥ ५ ॥

बीजाक्षरार्थैः प्रथमं दुरापः
का वासना तत्र विचारणीया ।
तथापि सूर्यो ऽहमुदारबुद्धिर्
बीजं सबीजं विशदीकरोमि ॥ ६ ॥

तत्र° भास्करः° निबध्नाति । उत्पादकमिति । °

It ends (as collated):

दैवज्ञज्ञानराजात्मजकविगणकाचार्यसूर्याभिधान-
प्रोक्ते सद्बीजभाष्ये सुजनबुधजनानंदसंदोहहेतौ ।
सम्यक् सूर्यप्रकाशे पटुवटुहृदयध्वांतविध्वंसदक्षे
तूर्णं संपूर्णमेतद्बिविधमतिभरैर्भावितार्थ्यं हि बीजं ॥ १ ॥

यः षट्कर्मविचक्षणैकसुलभः सद्बीजवर्णाश्रयो
यत्र स्वर्णविशोधनादिविधिना व्यक्तं फलं दृश्यते ।
मूलं भावनया परं प्रकृतितो ऽप्यानंदहेतुर्नृणां
ध्यातॄणां† च गुरूक्तितो विजयते ह्यव्यक्तशास्त्रागमः॥२॥

गोदोदक्तटपूर्णतीर्थनिकटावासे तथा मंगला-
गंगासंगमतस्तु पश्चिमदिशि क्रोशांतरेण स्थिते ।
श्रीमत्पार्थपुरे बभूव परमाचारो द्विजन्माग्रणीर्
ज्योतिःशास्त्रविचारविस्तृतमतिः श्रीनागनाथाभिधः॥३॥

पुत्रस्तस्य कलाकलापकुशलः क्ष्मापालमालार्चितः
सौजन्यैकसुधाकरः क्षितितले सौभाग्यभाग्यास्पदं ।
कीर्तिर्यस्य दिगंतरेषु विबुधैर्व्याख्यात(° न)संख्यागमैर् ‡
विख्यातो ननु सत्कविर्विजयते श्रीज्ञानराजाभिधः ॥४॥

सिद्धांतं सुंदराख्यं ग्रहगणितविधौ जातके चैकमेकं
साहित्ये गीतशास्त्रे परमिदमकरोद् यश्चतुर्ग्रंथरत्नं ।
तत्सूनुः सूर्यदासः सुजनविधिविदां प्रीतये बीजभाष्यं
चक्रे सूर्यप्रकाशं स्वमतिपरिचयादादितः सोपपत्तिं [॥ ५ ॥

सुजनगणकवर्याः संनिरीक्ष्य प्रयांतु
प्रमुदमिह मदुक्तान्सद्विशेषानशेषान् ।
मुखविवरविकासैर्वा हि संतो ऽप्यसंतः
स्वहृदयगतमोहस्योज्झितं दर्शयंतु ॥ ६ ॥

षट्शक्रगणिते शके कृतं भाष्यमिंदुगुणवासरे निजे ।
पंचविंशति शतान्यनुष्टुभां ग्रंथसंमितिरिहास्ति केवलं॥७॥

व्याख्ये वासनयान्विते गणितयोर्लीलावतीबीजयोस्
तद्वच्छ्रीपतिपद्धतेश्च गणितं बीजं तथैकं व्यधात् ।
एकं ताजकमच्युता[न्य B., r.र्थ]मपरं काव्यद्वयं प्रौढधीः
सूर्यो बोधसुधाकराख्यमकरोदध्यात्मशास्त्रे ऽष्टमं§ ॥ ८ ॥

परोपकारार्थमुदाहृतेन सद्वाग्विलासेन रसोज्ज्वलेन ।
शब्दाभिधं ब्रह्म यतः प्रवृत्तं स प्रीयतां यादवराजसिंहः॥९॥

Cf. the same author's commentary on the *Līlāvatī* (no. 2809), where the verse enumerating the author's works occurs likewise. See also Colebrooke, Misc. Ess., ii., p. 451; Weber, Berl. Cat., no. 832.

[H. T. COLEBROOKE.]

---

* श्रीकंठसूनोर्धुमणिफणि° B. (°सूनोर्द्वि°) C.

† शत्रूणां B.; C. om. this stanza.

‡ व्याख्या हि शास्त्रागमैर् B.; व्याख्यासाख्यागमैर् C.

§ सूर्यो बोधकराख्यकाव्यमकरोद° B.; C. om. this verse and the next.

2824.

1891. Foll. 71; size 12¼ in. by 4 in.; clear Devanāgarī writing (European paper); 24 lines in a page.

Sūryadāsa's Sūryaprakāśa. [B.]

Though by no means faultless, this MS. is useful for checking the misreadings of the preceding MS. [Dr. J. Taylor.]

2825.

789. Foll. 134 (counted 133, nos. 62 and 73 being double, and 87 passed over); size 9¾ in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

Another copy of the *Sūryaprakāśa*, not very correct. [C.] [H. T. Colebrooke.]

2826.

2290. Foll. 74; size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 24 lines in a page.

The same work; being a reproduction of the preceding MS., slightly corrected by the copyist. [Calcutta.]

2827.

1533b. Foll. 86+71; size royal 8vo, 9¾ in. by 6¼ in.; good, modern Devanāgarī writing; 22–24 lines in a page.

Bījavivṛiti-Kalpalatāvatāra, also called *Bīja-pallava,* a commentary on the metrical portions of *Bhāskara's Bījagaṇita,* by *Krishṇa Gaṇaka,* son of *Ballāla.* [A.]

The author was the disciple of *Vishṇu,* who, on his part, was the pupil of *Nṛisiṃha* (nephew of *Gaṇeśa,* son of *Keśava*). The date of the work is fixed approximately by Colebrooke at about the close of the 16th century, "by the notice of it and of the author in a work of his brother *Raṅganātha,* dated 1524 Śaka (A.D. 1602), as well as in one by his nephew *Munīśvara*" (Misc. Ess., 2nd ed., ii., p. 407). Cf. no. 2775.

It begins (as collated and slightly corrected):

शिवयोर्भजनातिगौरवाद्यत्
सुतलीलाधृतकुंजरास्यरूपम् ।
अपहंतु ममांतरं तमस्तत्
सततानंदमयं महो महीयः ॥ १ ॥

यदीयचरणांभोजस्मर्तुः सकलसिद्धयः ।
भवंति वशवर्तिन्यः सिद्धेशीं तामहं भजे ॥ २ ॥

मिहिरमिव (! MSS., ? i.e. मिहिरव or मिहरिव) [वराहमिहिरं वंदे संदेहभेदिनं जगताम् ।
ज्योतिश्चक्रविभावनहेतुं जगदेकचक्षुरचक्षुद्रं ॥ ३ ॥

कविबुधजनमूर्धनि स्फुरंतं
कविबुधसंततसेवनीयपार्श्वम् ।
गणितनिपुणतां प्रवर्तयंतं
प्रणमत भास्करमीप्सितार्थसिद्ध्यै ॥ ४ ॥

कदापि नैव संभ्रमः स्थितश्च भौममंडले ।
अपूर्वमार्गमाश्रयन् जयत्यपूर्वभास्करः ॥ ५ ॥

आसीदसीमगुणरत्ननिधानकुंभः
कुंभोद्भवाभरणदिग्ललनाललाम ।
आशैशवार्जितविशेषकलानुवर्ती
श्रीकेशवः सुगणितागमचक्रवर्ती ॥ ६ ॥

तस्मादभूद्भुवनभूषणभूतमूर्तिः
श्रीमानगण्यगुणगौरवगेयकीर्तिः ।
ज्योतिर्विदागमगुरुर्गुरुसंप्रदाय-
प्रज्ञातशास्त्रहृदयः सदयो गणेशः ॥ ७ ॥

भ्रातुः सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभः ।
अवर्धयद्यो जगतामभीष्टं प्रह्लादमाश्चर्यकरः सुराणाम् ॥ ८ ॥

तच्छिष्यो विष्णुनामा स जयति जगतीजागरूकप्रतिष्ठः*
शिष्टानामग्रगण्यः सुभणितगणिताम्नायविद्याशरण्यः ।
यद्वक्त्रोन्मुक्तमुक्ताफलविमलवचोवीचिमालागलंतो
द्वित्राः सिद्धांतलेशा जगति विदधते ऽन्ये ऽपि सार्व- [ज्ञ्यगर्वम् † ॥ ९ ॥

---

* जगतीजागरूकः प्रदिष्टः B. C.

† सर्वज्ञगर्वं B.; सर्वज्ञवर्गं D.

तस्मादधीत्य विधिवत् त्रिस्कंधं ज्योतिषं गुरोः ।
कृष्णो दैवविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥ १० ॥

अव्यक्तत्वादिदं बीजमित्युक्तं शास्त्रकृद्भिः ।
तद्व्यक्तीकरणं शक्यं न विना गुर्वनुग्रहम् ॥ ११ ॥

अत्र शांडिल्यगोत्रमुनिवरवंशावतंसजडबिडनगरनिवासिकुं-भोद्भवभूषणादिग्भूषणसकलागमाचार्यवर्यश्रीमहेश्वरोपाध्यायतन-यनिखिलविद्यावाचस्पतिगणितविद्याचतुराननधरणितरणिश्री-भास्कराचार्यैः स्वगणितरूपं सिद्धांतशिरोमणिं चिकीर्षुः० निबध्नाति । उत्पादकं०

The colophon of the first part runs as follows:

दैवज्ञवर्यगणसंततसेव्यपार्श्व-
बल्लालसंज्ञगणकात्मजनिर्मिते ऽस्मिन् ।
बीजक्रियाविवृतिकल्पलतावतारे
जाता कृतिप्रकृतिरत्र तु चक्रवालं ॥

अत्र वर्गप्रकृतौ चक्रवालमपि वर्गप्रकृत्यंतर्गतमित्यर्थः ॥ इति श्रीसकलगणकसार्वभौमश्रीबल्लालदैवज्ञसुत-कृष्णदैवज्ञविरचिते बीजविवृतिकल्पलतावतारे निजभेदचक्रवालयुक्तवर्गप्रकृतिविवरणं ॥

The second part begins: अत्र अतो बीजं प्रवक्ष्यामीति बीजनिरूपणं०

It ends (as collated):

अभूत्पृथिव्यां प्रथितो गुणौघैश्
चिंतामणिर्दैवविदां वरिष्ठः ।
संपूजनानेहसि यस्य गौरी
स्मृता स्तुता प्रत्यहमाविरासीत् ॥ १ ॥

तत्सूनवः पंच बभूवुरेषां
ज्येष्ठो ऽभिरामः किल रामनामा ।
भविष्यदर्थज्ञतया हि यस्य
विदर्भराजो ऽपि निदेशकर्ता ॥ २ ॥

रामादभूतां सीतायां पुत्रौ कुशलवाविव ।
त्रिमल्लो गोपिराजश्च गुणैः सर्वैः समन्वितौ ॥ ३ ॥

त्रिमल्लसूनुर्जयति द्विजेंद्रो
बल्लालसंज्ञः शितिकंठभक्तः ।
यः संततं रुद्रजपादिसंगाद्
ब्राह्मं (ब्राह्म्यं B. C.) महो मूर्तमिवावभाति ॥ ४ ॥

दैवज्ञवर्यगणसंततसेव्यपार्श्व-
बल्लालसंज्ञगणकस्य सुतो ऽस्ति कृष्णः ।
रामानुजः स परमेश्वरतुष्टिहेतोर्
बीजक्रियाविवृतिकल्पलतामकार्षीत् ॥ ५ ॥

यद्भास्करेण निजधामगुणातिरेकात्
संपादितं सगुणवर्गघनं (०धनं C.; वर्णधनं B.) हि [बीजं ।
तत्कृष्णभूमिमधिगम्य विचारवारि-
संसिक्तमंकुरजनुष्यभवत्समर्थं ॥ ६ ॥

यैर्यैः श्रमैर्विचरितो ऽस्ति नवांकुरो ऽसौ
तेषामभिज्ञ इह कः परमात्मनो ऽन्यः ।
इत्थं विचिंत्य जगदीश तवैव तुष्ट्यै
सर्वज्ञ ते चरणयोर्निहितस्ततो ऽयं ॥ ७ ॥

In Aufrecht's Cat. Cat. a *Bījavivṛitikalpalatā*, by *Paramasukha*, is mentioned from the Cat. of N.W. Pr. MSS. But this is possibly based on a wrong reading in the above 5th final *śloka*.

[H. T. COLEBROOKE.]

2828.

1946. Foll. 162; size 10 in. by 4 in.; legibly written, in Devanāgarī, in 1654 A.D.; 9–13 lines in a page.

Kalpalatāvatāra. [B.] A good, though by no means faultless, copy.

Dated: शके १५७६ जयसंवत्सरे वैशाखशुक्ल १ शुक्रे समाप्ता लिखितं ॥

[DR. JOHN TAYLOR.]

2829.

1974. Foll. 196 (counted 195, no. 138 being double); size 8½ in. by 6 in.; good, modern Devanāgarī writing; foll. 1–49, 15–18; foll. 50–196 (by a different hand), 12 or 13 lines in a page.

The same work. [C.]

On fol. 1*a* it is by mistake called *Vījāvataṃsa*, under which title it has figured in the old list. [DR. JOHN TAYLOR.]

2830.

611b. Foll. 122; size 10 in. by $4\frac{1}{2}$ in.; good, clear Devanāgarī writing; nine lines in a page.

Another copy of *Kṛishṇa's Kalpalatāvatāra,* incomplete at the end; the last two chapters being wanting. [D.]

A few lines have been added by a modern hand, including the colophon.

The MS. was copied by the same hand as the text of the *Bījagaṇita* (dated 1704 A.D.), which precedes it. [H. T. COLEBROOKE.]

2831.

2291. Foll. 84; size 4to, 13 in by 10 in.; fair Devanāgarī writing of 1813 A.D.; 23 lines in a page.

The same work, copied from the preceding MS. [CALCUTTA.]

2832.

1945. Foll. 196; size $9\frac{1}{2}$ in. by 5 in.; good, modern Devanāgarī writing; generally twelve lines in a page.

Bījaprabodha, a commentary on *Bhāskara's Bījagaṇita* (the text of which is given in full), by *Rāmakṛishṇa,* son of *Lakshmaṇa,* and grandson of *Nṛisiṃha,* of Amarāvatī.

The commentary begins:

सर्वज्ञं भास्करं नौमि सोमनाथं च सद्गुरुं ।
मुनीश्वरं महाप्रौढं प्रौढतत्त्वार्थसागरं ॥ १ ॥

ज्योतिर्विद्रामकृष्णः स च भुवि विदुषां शीतलत्वं प्रपन्नो
श्रोत्वा पुण्यौघदेशान् गुरुपदभजनात्प्राप्तबोधो बुधो ऽहं ।
प्रौढश्रीभास्करीयं लघुतरगणितं बीजसंज्ञानिपन्नं
तस्योपायं च कुर्वे दिनकरसुमुदे ऽसौ दयालस्य(?) भूयात्
[॥ २ ॥

अथ शांडिल्यगोत्रोत्पन्नजडविडनगरनिवासी सकलागमाचार्यवर्यमहेश्वरोपाध्यायतनयो निखिलतत्त्वार्थविच्छ्रीमद्भास्कराचार्यो ग्रहगणितस्वरूपसिद्धांतशिरोमणिं चिकीर्षुस्तदुपयोगितया तदध्यायात्मकं पाटीगणितमुक्त्वा तथाभूतमव्यक्तगणितं प्रारभमाणः प्रत्यूहव्यूहनिरासाय शिष्टाचारपरिपालनाय च मंगलमाचरन् शिष्यशिक्षार्थं बध्नाति । उत्पादकमिति । °

It ends:

नृसिंहपदसेवनात्सकलसिद्धिपारंगतो
नृसिंह इति नामतो नृपजनैरभूद्बंहितः(? वंदितः or
तदात्मज उदारधीर्विबुधलक्ष्मणस्तत्सुतो [बृंहितः) ।
विधाय गुरुदेवतां स्वहृदि रामकृष्णाभिधः ॥ १ ॥

श्रीप्राणनाथयदुरामकुबेरमुख्यैः
संप्रेरितः सुजनतंत्रविदां [सु]खार्थं ।
बीजप्रबोधमकरोदमरावतीस्थो
देवाधिदेवचरणे स समर्पितो ऽस्तु ॥ २ ॥

ये रामकृष्णभजने विहितादरा ये
ऽहंकारदोषरहिताः परिशुद्धचित्ताः ।
बीजप्रबोधपरिचिंतनवर्तमानास्
तेषां सदैव सुखसंपदुपैति वृद्धिः ॥ ३ ॥

इति श्रीमदमरावतिस्थश्रीमन्नृसिंहदैवज्ञात्मजलक्ष्मणदैवज्ञसुतसिद्धांतविद्दैवज्ञरामकृष्णविरचिते बीजप्रबोधे ग्रंथालंकारः समाप्तः॥

[H. T. COLEBROOKE.]

2833.

1356. Foll. 140 (counted 139, fol. 23 being double); size 10 in. by 5 in.; good, clear, modern Devanāgarī writing; eleven lines in a page.

Bījodāharaṇa-Bālabodhinī, a commentary on the *Bījagaṇita,* composed (in Śaka 1714, A.D. 1792) by *Kṛipārāma Miśra,* of Ahmadābād in Gujarāt, son of *Miśra Lakshmīnārāyaṇa,* and pupil of *Lakshmīnātha.*

It begins:

महेशानं गौरीगणपतियुतं शुद्धमनसा
प्रणम्य ज्ञानाम्भोनिधिमथ गुरुं कायवचसा ।
कृपारामो मिश्रः प्रकुरुत ऋजुं बीजगणिते
ऽबोधध्वांतौघप्रहरणपरोदाहृतिमिमां ॥ १ ॥

उत्पादकमिति °

It ends:

देशे गुर्जरनाम्नि धाम्नि यशसः स्थाने ऽमदावादके
भारद्वाजकुलप्रसूतिरभवन्मोटद्विजौघाग्रणीः ।
विद्यावेदकलामलाचलगतिः स्फूर्जन्मतिर्जोंपिता (!)
मिश्रः श्रीमदनन्दवन्दितपदद्वन्द्वश्चतुर्वैदिकः ॥ १ ॥
लक्ष्मीनारायण इति मतिख्यातकीर्तिर्धरित्र्यां
तस्यात्मासीदगगनगतिर्ज्ञानगीर्वाण एव ।
सूनुस्तस्याध्ययनविधिनोपात्तसिद्धांतविद्यो
लक्ष्मीनाथान्निजगुरुवराच्छ्रीकृपारामनामा ॥ २ ॥
भुवनात्यष्टिमे शाके सुनभःपूर्णिमागुरौ ।
बीजस्योदाहृतिमिमामकरोद्बालबोधिनीम् ॥ ३ ॥

इति श्रीगुर्जरब्राह्मणमोटचातुर्वेदीमिश्रलक्ष्मीनारायणात्मज-मिश्रकृपारामदैवज्ञविरचिते बीजोदाहरणे बालबोधिन्याख्यं ग्रंथं समाप्तम् ॥ [H. T. COLEBROOKE.]

2834.

1046. Foll. 96 (foll. 1, 2 and 56 of which are wanting); size 8 in. by 4¼ in.; fair Devanāgarī writing of 1688 A.D.; 9 or 10 lines in a page.

Gaṇitādhyāya and *Golādhyāya*, being the last two chapters, the 4th and 5th, of *Bhāskarācārya's Siddhāntaśiromani,* containing the astronomical portion of the work.

Editions of these sections (with the *Vāsanābhāshya*) have been published, by L. Wilkinson, Calc., 1842, and by *Paṇḍit Bāpū Deva Śāstrī*, Benares, 1866. An English translation of the *Golādhyāya*, by Wilkinson, revised by *Bāpū Deva Śāstrī*, Bibl. Ind., 1861.

This MS. agrees, on the whole, with the Benares text, except that the two chapters before the last, as well as part of the last chapter itself, are omitted; and the author's genealogy is taken out of the *praśnādhyāya*, and placed at the end of the work, with the date of its composition as given by Colebrooke, Misc. Ess., ii., 349–419. The MS., which is not very correct, was copied by one *ṛishi Narasiṅgha.* [H. T. COLEBROOKE.]

2835.

312a. Foll. 64; size 13½ in. by 4½ in.; modern Bengalī handwriting; seven lines in a page.

Gaṇitādhyāya and *Golādhyāya.*

The variations from the printed text are more considerable in this than in the previous MS., the last 7 chapters (after fol. 52*b*) being contracted into 3, and the sections differently arranged. Fol. 46 has been by mistake inserted between 34 and 35.

[H. T. COLEBROOKE.]

2836.

2267. Foll. 54; size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 24 lines in a page.

The same two chapters of the *Siddhānta-śiromaṇi.*

This MS., being one of the set of modern copies referred to under no. 2770, was probably transcribed from another Devanāgarī MS., avoiding as it does those mistakes peculiar to transcripts from a Bengalī original.

[CALCUTTA.]

2837.

871a. Foll. 27; size 11 in. by 4½ in.; modern Bengalī handwriting; 9–11 lines in a page.

Gaṇitādhyāya. [H. T. COLEBROOKE.]

2838.

159. Foll. 124 + 85 + 33; size 12¼ in. by 6¼ in.; fair, large Devanāgarī writing of the Kaśmīr type of about 1750 A.D., with coloured borders; twelve lines in a page.

Gaṇitādhyāya and *Golādhyāya* of *Bhāskara's Siddhāntaśiromaṇi*, with the author's own commentary, *Vāsanābhāshya,* also known by the special title of *Mitākshara.*

The *Gaṇitādhyāya* here consists of two sections, numbered separately, the first of which has been accidentally placed at the end of the volume. The MS. agrees, on the whole, with the Benares edition.

[H. T. COLEBROOKE.]

2839.

2268. Foll. 23 + 81 + 56 (two of these, 26 and 27, being double); size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 23 lines in a page.

Gaṇitādhyāya and *Golādhyāya*, with the *Vāsanābhāshya*.

This MS. seems to be a reproduction of the preceding volume; the sections being, however, bound in the proper order.

[CALCUTTA.]

2840.

1319. Foll. 67 + 136; size 12¼ in. by 4¼ in.; fair Devanāgarī writing of 1799 and 1805 A.D.; nine lines in a page.

Golādhyāya and *Gaṇitādhyāya*, with the *Vāsanābhāshya* or *Mitāksharā*.

In the pagination of the second part, nos. 17 and 46 have been passed over, whilst foll. 10 and 118 are double.

[H. T. COLEBROOKE.]

2841.

2285. Foll. 60 + 100; size 4to, 13 in. by 9¾ in.; good Devanāgarī writing of 1799 and 1817 A.D.; 23 lines in a page.

Golādhyāya and *Gaṇitādhyāya*, with the author's commentary; apparently a reproduction of the preceding volume, or copied from the same original; with corrections by a different hand. [CALCUTTA.]

2842, 2843.

340a, b. Foll. 130 + 75; size 11½ in. by 8¾ in.; fairly good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Gaṇitādhyāya and *Golādhyāya*, with the *Vāsanābhāshya*.

In the first part a gap occurs, foll. 102, 103 and 104*a* having been left blank, corresponding exactly to as many pages in the Benares edition. [H. T. COLEBROOKE.]

2844.

2012. Foll. 231; size 9¼ in. by 5 in.; modern Devanāgarī writing; nine lines in a page.

Gaṇitādhyāya, with the *Vāsanābhāshya*. An indifferent copy, a good deal worm-eaten.

[DR. JOHN TAYLOR.]

2845.

2287. Foll. 118; size 4to, 13 in. by 9½ in.; good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Gaṇitādhyāya, with the *Vāsanābhāshya*.

[CALCUTTA.]

2846.

1529. Foll. 60; size 10¼ in. by 6½ in.; good, modern Devanāgarī writing of the Kaśmīr type; enclosed in gold and coloured borders; eight lines in a page.

The first portion of the *Gaṇitādhyāya*, with the author's commentary; corresponding to the section at the end of MS. 159, and to pp. 1–55 of the Benares edition.

[H. T. COLEBROOKE.]

2847.

1855. Foll. 98; size 10½ in. by 4 in.; fair Devanāgarī writing of 1660 A.D.; 8–10 lines in a page.

Golādhyāya, with the author's *Vāsanābhāshya*, or *Mitāksharā*.

Dated: शाके १५८२ शार्वरीवत्सरे। अधिकज्येष्ठशुक्ल ८ चंद्रे॥

[DR. JOHN TAYLOR.]

2848.

1221. Foll. 86; size 10¾ in. by 4¼ in.; fair Devanāgarī writing of 1800 A.D.; nine lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[H. T. COLEBROOKE.]

2849.

2286. Foll. 59; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 23 lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[CALCUTTA.]

2850.

2288. Foll. 75; size 4to, 13 in. by 9¾ in.; good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[CALCUTTA.]

2851.

1326. Foll. 208 + 65; size 4to, 11¾ in. by 9¼ in.; fair, modern Devanāgarī writing; 19–23 lines in a page.

Gaṇitatattvacintāmaṇi, a commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskarācārya's Siddhāntaśiromaṇi*, composed in 1501 A.D., by *Lakshmīdāsa*, son of *Vācaspati Miśra*, and grandson of *Keśava*, of the *Upamanyugotra*. [A.]

It begins:

यः पद्मोद्भवदेवदानवपितृक्षोणीतलस्य (स्य B.) क्षपा-
हःसंध्यादिविभागबोधितजगत्प्राग्भारमध्यान्तकृत्।
गाढध्वान्ततिरोहिताखिलपदार्थानात्मभाभिर्जनो-
द्भेगोत्थव्यपयेव भासयति तं वन्दे ग्रहाणां पतिं॥ १॥

Cf. Aufrecht, Cat. Trin. Coll. Camb., p. 51–4, where also a list of the authorities quoted is given; Weber, Berlin Cat., no. 843.

Numerous marginal notes, in Colebrooke's hand, bear evidence to his careful study of the work, and the help it afforded him in acquiring his knowledge of early Indian astronomy.

Appended to the MS. are 18 leaves containing an excellent index to the work.

The original MS. from which this was transcribed was executed, at Argalāpura, in Saṃvat 1656 (A.D. 1599), in the reign of *Pādishāh Akbar*. [H. T. COLEBROOKE.]

2852.

2269. Foll. 262 (numbered 272; nos. 201–210 having been passed over); size 4to, 13 in. by 9 in.; good Devanāgarī writing of 1812 A.D.; 23 lines in a page.

The same work.

A reproduction of the preceding volume; foll. 1–183 containing the *Gaṇitādhyāya*, the remaining leaves the *Golādhyāya*.

The index has likewise been copied on 16 leaves, with the reference numbers daubed over, as it was discovered that they could not be applied to the present MS. [CALCUTTA.]

2853.

2093. Foll. 253 (numbered 255; nos. 139 and 199 having been passed over); size 9½ in. by 5½ in.; good Devanāgarī writing of 1762 A.D.; 10–12 lines in a page.

Lakshmīdāsa's Gaṇitatattvacintāmaṇi on the *Gaṇitādhyāya* of the *Siddhāntaśiromaṇi*. [B.]

The text presented by this copy is more correct than that of MS. 1326.

Dated: संवत् १८१९ वर्षे मितिमार्गशीरसुदी ७ गुरुवासरे लिषितं रोडूराम जोडपुरामध्ये॥ नंदग्राम॥ [GAIKAWAR.]

2854, 2855.

594, 134. Foll. 1–153 and 154–306; size 9¾ in. by 5 in.; clear Devanāgarī writing of 1778 A.D.; eleven lines in a page.

Gaṇitatattvacintāmaṇi on the *Gaṇitādhyāya* of the *Siddhāntaśiromaṇi.*

Although not very correct, it is none the less useful for checking the mistakes of the other two MSS. Dated:

वर्षे पंचाग्निवस्विंदुमितहरिदिने कार्त्तिके कृष्णपक्षे
वारे सूर्यस्य सांघ्रिर्जयहरिनगरे गोमतीतीरवासी ।
ज्ञातौ श्रीपार्वतीयः शुकतनयवरः शंकरो भास्करीय-
टीकां तत्त्वाख्यचिंतामणिमयमलिखत्स्वार्थपुत्रार्थसिद्ध्यै ॥

[H. T. COLEBROOKE.]

2856.

1389a. Foll. 19; size 14 in. by 5 in.; modern Bengalī handwriting; seven lines in a page.

A fragment of the *Golādhyāya,* with *Lakshmīdāsa's Gaṇitatattvacintāmaṇi,* consisting of the 2nd chapter, or *bhuvanakośa.*

[H. T. COLEBROOKE.]

2857, 2858.

1648, 1706. Foll. 133 and 85 (or rather 86, fol. 43 being double); size 9¼ in. by 4½ in.; fairly good Devanāgarī writing of 1751 A.D.; 10 and 11 lines in a page.

Siddhāntaśiromaṇi-Vāsanāvārttika, a commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskarācārya's Siddhāntaśiromaṇi-Vāsanābhāshya;* by *Nṛisiṃha,* son of *Krishṇa,* and grandson of *Divākara,* who was the pupil of the son of *Keśava* (? i.e. *Gaṇeśa*) of Koṅkaṇa (the Concan). [A.]

The author's ancestry is traced still further up to *Bhaṭṭācārya, Divākara's* father, who was the son of *Rāma,* a *Mahārāshṭriya* Brāhman residing at Golagrāma on the Godāvarī.

The work was composed in Śaka 1543 (1621 A.D.), when the author had attained the age of 35.

Part I. begins (as collated with MS. 1939):

यस्मात्सर्वमिदं जगत्समुदितं स्रोत्सृष्टभूतैः पुरं (? पुरः)
कृत्वा तत्र निविश्य मानसगुणान्स्वस्मिन्वृथा मन्यते ।
स्वाज्ञानादिव बद्धमुक्त इति यं वेदो निबंधावधिं
[(निषेधा° B.)
ब्रह्मेत्याह न वेद कश्चिदपि यं प्रेमास्पदं तं भजे ॥ १ ॥
गंगाधरायामितविक्रमाय त्र्यक्षाय शर्वाय दिगंबराय ।
त्रिशूलहस्ताय नमः शिवाय सुरेंद्रवंद्याय जटाधराय ॥ २ ॥
नमामि लक्ष्मीपतिमिंद्रवंद्यमुपेंद्रमिंद्रावरजं चतुर्भुजं ।
गदारथांगाब्जसुशंखहस्तं सुपर्णपृष्ठोपरिगं वरप्रदं ॥ ३ ॥
यां मूलप्रकृतिं जगाद कपिलो वेदांतिनो यां महा-
मायामित्यपरे हरस्य गृहिणीं त्रैलोक्यरक्षाकरीं ।
भक्तापद्विनिवारिणीं सुरगणैर्वंद्यामनिंद्यां जगद्-
वंद्यां तां प्रणमामि विश्वजननीं वेदैर्विमृग्यां परां ॥ ४ ॥
यद्भावः खगभादिके जलमये संमूर्छिता भास्करा
ध्वांतं तत्क्षपयंति नैशमनिशं यः सर्वदा भासते ।
कालात्मा खलु कालकृत् समयदिग्देशस्य यो व्यंजकस्
तस्मै चंद्रतनोः क्षयोपचययोः कर्त्रे सवित्रे नमः ॥ ५ ॥
लंबोदरं विघ्नविनाशनाय गजाननं नौमि परावरेशं ।
यः कर्मकाले स्मरणेन सद्यः कार्यस्य सिद्धिं विदधाति
[पुंसां ॥ ६ ॥
यस्याः प्रसादमासाद्य जडो याति बुधार्यतां ।
ब्राह्मी जयति सा वाणी वीणापुस्तकधारिणी ॥ ७ ॥
निजतातस्य कृष्णस्य कृत्वा पादांबुजं हृदि ।
शास्त्रं पितृव्यतोऽधीत्य वक्ष्ये पूर्वां सुवासनां ॥ ८ ॥
सिद्धांतवासनाभाष्यममितार्थं मिताक्षरं ।
व्याख्यायते नृसिंहेन गणकानंदहेतवे ॥ ९ ॥
विधाय सूर्यसिद्धांतवासनाभाष्यमुत्तमं ।
वासनावार्त्तिकं कर्तुमुद्यतोऽस्मि शिरोमणेः ॥ १० ॥

अथ शांडिल्यमुनिवरगोत्रावतंसः° श्रीभास्कराचार्यः° सिद्धांत-शिरोमणिं प्रणिनाय ॥ °

This part ends thus:

श्रीमत्कोंकणवासिकेशवसुतप्राप्तावबोधाद्बुधाद्
भट्टाचार्यसुताद्दिवाकर इति ख्यातादजनि प्राज्ञवान् ।
यः कृष्णस्तनयेन तस्य रचिते सद्वासनावार्त्तिके
सत्सिद्धांतशिरोमणेरयमगात्पाताधिकारः स्फुटः ॥
इति नृसिंहकृतौ वासनावार्त्तिके ग्रहगणिताध्यायः ॥

Part II. begins:

विघ्नेश्वरं नमस्कृत्य मल्लारिं च गजाननं ।
भास्करीयस्य गोलस्य वार्त्तिकं क्रियते ऽधुना ॥ १ ॥
कश्चिद्व्रमार्गादुपरि स्फुरंतं समं भ्रमंतं ⏑⏑न⏑भेन ।
अधः स्थितों(!) चाप्यचलं[च]मानमुच्चै गुरोर्भास्करमात-
[नोमि ॥ २ ॥ ०

It ends: इति श्रीसकलगणकचक्रचूडामणिकृष्णदैवज्ञसुत-नृसिंहगणकविरचिते सिद्धांतशिरोमणिवासनावार्त्तिके ज्योत्पत्तिः॥

बुद्धेर्विवृद्ध्यै गणितप्रबंधविचारसारामृतमावहंती ।
सद्वासनासितमानसानां मदुक्तिरेषा मुदमादधातु ॥ १ ॥
गुणवेदशरेंदुसंमिते १५४३ शककाले नगरे पुरेशितुः ।
वसता वरणा⏑–⏑–⏑नृसिंहेन विनिर्मितं त्विदं ॥ २ ॥
जिते(? निजे) तत्त्वमिते वर्षे सौरभाष्यं मया कृतं ।
पंचविंशन्मिते वर्षे वासनावार्तिकं कृतं ॥ ३ ॥
नवीनयुक्तिप्रतिपादनेन पूर्वोक्तमंत्रादपि सविशेषं ।
नरप्रणीताद्धरिप्रणीतं स्वीकार्यमार्यैः स्वधिया विचार्य
[॥ ४ ॥

गोदावरीसौम्यतटोपकंठ-
ग्रामे च गोलेऽभिधया(? गोलाभि०) प्रसिद्धे ।
विप्रो महाराष्ट्रसुगीतकीर्तिर्
बभूव रामो गणकार्यवंशः ॥ ५ ॥
अग्रणीस्तैत्तिरीयाणां भट्टाचार्यस्तु तत्सुतः ।
आसीन्मीमांसकश्रेष्ठः कुमारिल इवापरः ॥ ६ ॥
गोत्रे भरद्वाजमुनेः पवित्रे
दिवाकरस्तत्तनयो बभूव ।
वेदांतशास्त्राभ्यसनेन काश्यां
यः पुण्यराश्यां तनुमुत्ससर्ज ॥ ७ ॥
सांवत्सरार्यस्य दिवाकरस्य
श्रीकृष्णदैवज्ञ इति प्रसिद्धः ।
बभूव पुत्रः सुतरां पवित्रः
सत्तीर्थकर्ताखिलशास्त्रवेत्ता ॥ ८ ॥
तज्जस्तु तस्यैव कृपालवेन
तातानुजावाप्तसमस्तविद्यः ।
सद्वासनावार्त्तिकनामधेयं
ग्रंथं नृसिंहो रचयां बभूव ॥ ९ ॥
न या वराहेण च जिष्णुजेन
पृथूदकेनार्यभटेन जुष्टाः ।
असंस्तुता भास्करदर्शनेन
ता वासनावार्त्तिक एव लभ्याः ॥ १० ॥
सदुक्तिसद्युक्तिजलांजलीभिः
संदेहसंदेहवधं विधाय ।
बुध[ाः प्रभा] भास्करदर्शनोत्थाम्
आस्वादयंतो ऽभिमतानि कुर्युः ॥ ११ ॥

इति श्रीगणचक्रचूडामणिनृसिंहकृते सिद्धांतशिरोमणिवासनावार्त्तिके ग्रंथसमाप्त्यलंकारः ॥

Of less known works quoted by the author may be mentioned a *Śaivāgamasārasaṃgraha*, and a *Saṃgrahakārikā*, i., fol. 9a. See also the list of authorities quoted in the author's commentary on the *Sūryasidhānta*, Aufrecht, Cat. Trin. Coll. Camb., p. 43.

[H. T. Colebrooke.]

2859, 2860.

2289, 2283. Foll. 87 and 58 resp.; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 24 and 23 lines in a page.

Vāsanāvārttika on the *Gaṇitādhyāya* and *Golādhyāya*. A reproduction of the preceding two volumes. [Calcutta.]

2861.

1939. Foll. 130 (of which 39-42, 45-50 are wanting); size 10½ in. by 4 in.; legibly written, in Devanāgarī, about 1700 A.D.; 9-11 lines in a page.

Gaṇitādhyāya of *Nṛisiṃha's Vāsanāvārttika.* [B.]

At the end the following definition of *sūtra, bhāshya* and *vārttika* has been added:

भाष्यलक्षणं ॥
सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुः ॥
सूत्रलक्षणं ॥
अल्पाक्षरमसंदिग्धं सारवत्सर्वतोमुखं ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
उक्तानुक्तदुरुक्तचिंतावार्त्तिकमिति वार्त्तिकलक्षणं ॥

[Dr. John Taylor.]

2862–2868.

188, 207b, 182, 1231a, b, 190, 585. Foll. 834; size 10¾ in. by 4½ in.; fairly good Devanāgarī writing of the end of last century; 9–13 lines in a page.

Marīci, a copious and excellent commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskara's Siddhāntaśiromaṇi*, by *Munīśvara*, surnamed *Viśvarūpa*, son of *Raṅganātha* (who was one of five sons, the 4th, of *Ballāla*), and pupil of his uncle *Kṛishṇa*. Cf. nos. 2775, 2827.

At the end of his *Gūḍhaprakāśa* (Hall, *Sūryasiddhānta*, p. 388), *Raṅganātha* states that Wednesday, *śambhutithi*, of the light fortnight of *Caitra* of the year Śaka 1524 or 1525 (A.D. 1602-3) witnessed both the completion of his work, and the birth of his son *Munīśvara*.

I. *Gaṇitādhyāya* begins (somewhat amonded):

प्रातर्बोधितपद्मपत्रविकसन्नेत्रो नवीनो(ना)बुद-
श्यामः पीतदुकूलशोभिततनुः श्रीवत्समुद्रान्वितः ।
वंशीवादनतत्परो रविसुतातीरोपगो नैचकी-
गोपीभिः परिवेष्टितो मम मनस्यास्तां रंभावल्लभः ॥१॥

यः पूरयत्यनुदिनं प्रणतस्य कामान्
स्वांतस्थितान् स[क]लविघ्नचयं निरस्य ।
सिंदूरपूरपरिपूरितकुंभयुग्मो
भूयान्मुदे गणपतिर्गजराजवक्त्रः ॥ २ ॥

या भारती सर्वबुधावलीना
मुखान्तरंगे नटनं करोति ।
सा मे मुखे वास्तुविधिं करोतु
वस्तुं सदालंकृतिभूषितांगी ॥ ३ ॥

यो बोधयत्यनुदिनं विबुधारविंदं
तत्पूर्वपक्षरजनीतिमिरं निरस्य ।
ज्योतिर्विभावनविधेस्तु निदानभूतं
श्रीमद्वराहमिहिरं मिहिरं च वंदे ॥ ४ ॥

येनाधायि कुतूहलादतितमां पाठे सुधांभोनिधेः
प्रौढाहंकृतिवादिवारणगणान्यक्कारढक्कारवः ।
ज्योतिःशास्त्रदुरंतकाननमहासंचारपंचाननं
तं चातुर्यकलापकुशलं श्रीभास्करं भावये ॥ ५ ॥

गौरीभक्तेर्भजनकलया नीतकालः पितृव्यः
श्रीमद्रामो निखिलविषये सन्नबुद्धिप्रकाशः ।
ज्योतिस्त[ो]कानलकबलने मूलभूनष्टकोरः(?)
कृष्णभ्राता जयति नितरां मद्गुरुर्वैर्यवर्यः ॥ ६ ॥

सिद्धांतांबुजबोधनैकमिहिरस्त्रिस्कंधपारंगमो
न्यायेनात्तमतिः कवित्वकरणे साक्षात्पुराणो मुनिः ।
आम्नायप्रतिपादितार्थदृढताविख्यातसारस्वतो
विष्णुः कृष्णगुरुर्जयत्यतितरां श्रीमद्गणेशात्मधीः ॥ ७ ॥

यः श्रीकृष्णपदांबुजाहितमतिः सिद्धांतवारां निधेः
पोतः श्रीजहगीरभूमितिलकस्याननविभ्रासभूः ।
षट्शास्त्रेषु कृतश्रमो ऽखिलगुरुर्मान्यो वदान्यो विदां
श्रीकृष्णः किमु वर्णनीयविभवः श्रीकृष्ण एवापरः ॥८॥

श्रीरंगनाथाभिधतातपादाः
कृष्णानुजाः श्रीकमलाधिपास्ते ।
त्रिस्कंधपारंगमरंगमल्ला
बल्लालजा भूमितले जयंति ॥ ९ ॥

नारायणो गणितशास्त्रकलाप[विज्ञ]:
श्रीसेवितः सकलशास्त्रसरोजभृंगः ।
दैवज्ञकृष्णगुरुपादरतो गुरुर्मे
क्ष्मायां जयत्यखिलपंडितवंद्यपादः ॥ १० ॥

मुनीश्वरापराख्येन विश्वरूपेण गुध्यते
शुद्धिशाणे मरीच्यर्थे सत्सिद्धांतशिरोमणिः ॥ ११ ॥

सत्रोपपत्तिविषये तु मया यदुक्तं
तत्सर्वमेव परिभावितमस्ति मन्यैः ।
मान्यान्प्रणम्य विहितांजलिश्च याचे
सद्भिस्तथापि परिभाव्य शोधनीयं ॥ १२ ॥

ग्रंथारंभे° निबध्नाति । यत्र चातुमिदमिति । °

Vol. I. (MS. 188), foll. 127, corresponds to pp. 1–55 of *Bāpū Deva Śāstrī's* edition of the *Siddhāntaśiromaṇivāsanābhāshya*; and is dated Saṃvat 1849.

Vol. II. (MS. 207b), foll. 96 (from fol. 87 wrongly numbered 88–97), corresponds to pp. 56–94 of the edition.

Vol. III. (MS. 182), foll. 226 (numbered 228; nos. 95 and 175 being double, and 113, 163, 172, 173 passed over; and the first leaf wanting),

corresponds to pp. 95–186 of the edition. Between this and the following volume there is a gap extending over the *grahacchāyā-*, *grahodayāsta-*, and *śriṅgonnati-adhikāras* of *Bhāskara's* work.

Vol. IV. (MS. 1231*a*, *b*), foll. 44+75, contains resp. the end of the *Gaṇitādhyāya* and the beginning of the *Golādhyāya* as far as p. 277 of the edition.

Vol. V. (MS. 190), foll. 110, corresponds to pp. 277–315 of the edition.

Vol. VI. (MS. 585), foll. 156 (numbered 157; no. 63 being passed over), corresponds to pp. 315–379 of the edition. Besides the Śaka date '*khāṅgavāṇadharaṇī*' (i.e. 1560), which must have been that of a former MS., it gives its own date as Saṃvat 1842 (A.D. 1785).

II. *Golādhyāya* [A] begins (as collated with MS. 163):

नित्यानन्दज्ञानरूपं महो ऽहं
 विश्वाज्ञानध्वान्तविध्वंसदक्षं ।
श्रीकृष्णाख्यं सर्वदाभीष्टसिद्धै
 ध्यायामीशं सर्वगं सर्वहेतुं ॥ १ ॥

अथोत्तरार्धं गुरुरामकृष्णपितृव्यपादाब्जयुगप्रसादात् ।
व्याख्यायते सद्गणकाभितुष्ट्यै प्रज्ञानुसारेण मुनीश्वरेण ॥२॥

अथ ग्रन्थादौ ° प्रतिजानीते । सिद्धिं साध्यामुपैति ° ॥

It ends:

द्विखण्डयोगाम्मणिमेतमार्यो
 न जातु हातुं धिषणां दधातु ।
यतो ऽस्य शुद्धा खलु विश्वरूप-
 प्रकाशिनी चारुतरा मरीचिः ॥ १ ॥

गङ्गाभेशिलनगराद्गोदावर्यनुगतादुपाया[सी]त् ।
एलचपुरसमदेशे तटे पयोष्ण्याः शुभे दधिग्रामे ॥ १ ॥

ज्योतिर्विद्याविद्भिः सकलैः शिरसा सदा बुधैर्धार्यः ।
विजयतु यजुःश्रुतिज्ञो गणकश्चिन्तामणिर्नाम्ना ॥ २ ॥

तस्मादभवद्रामः सकलैः सुगुणैर्नितान्तमभिरामः ।
शासद्विदर्भदेशं मूर्धाधाद्भूमिपो यदा देशं ॥ ३ ॥

सो ऽजनयत्सीतायां त्रिमल्लसंज्ञं सुतं विनीतायां ।
येन सदा विनयेन प्रकाशितं नाम भुवि नयेन(?) ॥ ४ ॥

बल्लालस्तत्तनयः सदैव यः कविवरेषु दत्तनयः ।
अपहाय स्वग्रामं काश्यामागाद्गजन्तविश्वग्रामं ॥ ५ ॥

ज्योतिःशास्त्रवराम्भोजप्रकाशनदिनेश्वरान् ।
प्रासूत पञ्च तनयानयं गणकपुङ्गवः ॥ ६ ॥

ज्यायानमीषां खलु रामनामा
 सदैव कामादिसमर्पितात्मा ।
विभूष[यन्] धूर्जटिराजधानीम्
 असाविदानीमपि संचकास्ति ॥ ७ ॥

तस्यानुजः सकलशास्त्रसरोजभृङ्गो
 बीजक्रियाविवृतिकल्पलतानिदानं ।
श्रीनूरदीनपरमप्रणयैकपात्रं
 कृष्णो बभूव जनिपद्धतिवृत्तिकारः ॥ ८ ॥

तस्यानुजस्तु गोविन्दगणको यत्सुतो ऽकरोत् ।
नारायणः केशवोक्तपद्धत्याष्टिप्पणं सुधीः ॥ ९ ॥

गौरीवल्लभपादपङ्कजमिलन्माध्वीरसास्वादन-
 स्वच्छान्तःकरणैः श्रुतिस्मृतिरतो गोविन्दविज्ञानुजः ।
ग्रन्थे यो ऽर्ककृते ऽकरोद्विवरणं गूढप्रकाशं महा-
 देवस्याग्रजनिर्गुहस्थकमलः श्रीरङ्गनाथो ऽभवत् ॥ १० ॥

तस्यात्मजो गुरुकृपाजनितावबोधः
 शास्त्रं विभाव्य निखिलं महतादरेण ।
श्रीभास्करोदितशिरोमणिगूढभाव-
 व्याख्यां मुनीश्वरकृती कृतवान्मरीचिं ॥ ११ ॥

शको भूयुतो नन्दभूभृत्फलस्य
 निरेकस्य मूलं निरेकं भवेद्वै ।
तदर्धं भवेन्मास इन्दूनितो ऽयं
 तिथिर्धू(?ध्रु)नितौ पक्षवारौ भवेतां ॥ १२ ॥

नक्षत्रवारतिथिपक्षयुतिश्च योगो
 विश्वैर्युताखिलयुतिः पदमभ्रवेदाः ।
अस्या यदात्र परिपूर्तिमितो मरीचिः
 श्रीवासुदेवगणकाग्रजनिर्मितो ऽयं ॥ १३ ॥

हरा१९दनुद्धितस्वर५२३१मानगभूषट्त्रि३६१७संयुतात् ।
मूलंवीशं(?)११हर१९माद्वि७६भक्तं व्येकं फलं हि भं ॥ १४ ॥

यद्यपि टीका बहुलाः शिरोमणेः परमरमणीयाः ।
मन्ये विना मरीचिं तथाप्यभिज्ञेषु नास्य माहात्म्यं ॥ १५ ॥

नैवात्र विस्तृतिं दोषं निगदन्तु मनीषिणः ।
लोके मणौ मरीचेर्हि वैपुल्यं परमो गुणः ॥ १६ ॥

तस्यावबोधविधुरैः कृताप्युपेक्षास्य नो लघुत्वाय ।
विग्नैर्विहितावज्ञा न क्षताये(? नक्षत्रभये B.) चन्दनस्य
[नगे(मवोः B.) ॥ १७ ॥
यो निर्मितावस्य परः श्रमो ऽभूत्° ॥ १८ ॥
अयं मरीचिस्तव सुप्रसादात्° ॥ १९ ॥
एतस्यार्चनतः° ॥ २० ॥
शिव राम हर शिव कृष्ण हरे त्वदनुग्रहतस्° ॥ २१ ॥
सर्वाङ्गानि ममापि ते प्रणतिभिः साफल्यमायान्तु वै°
[॥ २२ ॥
चतुर्भुजं चक्रगदाब्जशङ्खधरं रमासेवितपादपद्मं ।
खगेश्वरस्थं घनवर्णमेनं चक्षुर्ममेदं विषयीकरोतु ॥ २३ ॥
[कायेन वाचा मनसापि चेष्टा° ॥ २४ ॥ B.]

The colophon of the present MS. runs thus:

इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगण-कतनयमुनीश्वरापरनामकगणकविश्वरूपविरचितः सिद्धांतशिरो-मणिमरीचिः समाप्तिमगमत् ॥

खांगवाणधरणीमितशाके चंद्रवारसितपक्षशुचौ हि ।
लोखतं गणकदर्शनहेतोरुत्तरार्धमिदमात्ममरीचेः ॥ २ ॥

To this Colebrooke has attached the following note:

"The copy from which this is a transcript was written by the author's directions in Śaka 1560, nearly the date of the work; for *Nuruddīn* is mentioned in the last leaf but one, as the same emperor by the title of *Jehangir* is in the preface to the commentary on the *Sūryasiddhānta* by the author's father *Ranganātha*."

[H. T. COLEBROOKE.]

2869–2874.

2282, 2273, 2281, 2272, 2270, 2271. Foll. 106, 208, 38, 74, 78 and 145 resp.; size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 26, 23, 18, 18, 25, 24 lines in a page.

The same work. A reproduction of the preceding set of volumes, with the exception of the second volume (MS. 207*b*), which is not represented in this copy.

The revision which the volumes have undergone by another hand is far from complete.

[CALCUTTA.]

2875.

345. Foll. 114+158; size 11¾ in. by 9 in.; fairly good Devanāgarī writing of 1792 A.D.; eighteen lines in a page.

Portions of the *Marīci* on the first few chapters of the *Gaṇitādhyāya*.

The MS. is almost worthless, having been written by an ignorant scribe, whose readings would hardly be worth taking into account, even if the MS. were in better condition than it is. It was written in two sections, and, in being bound, a number of leaves of the one section were exchanged with those of the other, so that the text is in utter confusion. Moreover, whole pages of the commentary are accidentally repeated in different places of the same section; and the volume looks as if it had been submerged in water, whereby a good deal of the writing has become obliterated, and several leaves torn and injured.

[H. T. COLEBROOKE.]

2876.

163. Foll. 275; size 4to, 12 in. by 9½ in.; indifferent Bengalī handwriting of the latter part of last century; 18–20 lines in a page.

Munīśvara's Marīci on the *Golādhyāya* of the *Siddhāntaśiromaṇi*. [B.]

This MS. presents, on the whole, a better text than the preceding volumes, though in the genealogical account at the end it is far less correct than MS. 585; and peculiar mistakes have throughout crept in, apparently through its having been transcribed from a Devanāgarī original.

Occasional pencil notes have been added by Colebrooke in the margin.

[H. T. COLEBROOKE.]

2877.

2280. Foll. 281; size 4to, 13 in. by 9¼ in.; clear, modern Devanāgarī writing; 20–23, from fol. 78*b*, 28 lines in a page.

The same work; apparently transcribed from the preceding MS.

An irregularity in the pagination occurs after fol. 77, where a new hand begins; and foll. 79–82 are counted twice. After fol. 269, the pages, instead of the leaves, are numbered consecutively. [CALCUTTA.]

2878.

2284. Foll. 63; size 4to, 13 in. by 9¾ in.; fairly good, modern Devanāgarī writing; nineteen lines in a page.

Examples of computations according to the *Siddhāntaśiromaṇi* (as a note in Colebrooke's hand describes it on the first page). The title given to it by the copyist, and repeated in Bengalī characters on the last page, is *Siddhāntaśiromaṇau gaṇitādhyāyasyodāharaṇaṃ siddhāntaśiromaṇivāsanābhāshyam.*

The leaves are counted from 76–138, in continuation, apparently, of the *Golādhyāya* in the preceding vol. 2288 (no. 2850) of this set. [CALCUTTA.]

2879.

340c. Foll. 60; size 11½ in. by 8¾ in.; modern Bengalī handwriting; eighteen lines in a page.

Another copy of the preceding "Examples from the *Śiromaṇi*," with the same Sanskrit title written in Devanāgarī at the back. [H. T. COLEBROOKE.]

2880.

2464f. Foll. 82; size 10¼ in. by 4¼ in.; good, clear Devanāgarī writing of 1577 A.D.; ten lines in a page.

Sārasaṃgraha gaṇitaśāstra (or *Gaṇitasārasaṃgraha*), a Jaina treatise on arithmetic, professing to be founded on the rules laid down by *Mahāvīrācārya*, the founder of the sect.

It begins: श्रीजिनाय नमः ॥ श्रीगुरुभ्यो नमः ॥

प्रणिपत्य वर्द्धमानं विद्यानंदं विशुद्धगुणनिलयं ।
सूरिं च महावीरं कुर्वे तद्गणितशास्त्रसद्वृत्तिं ॥ १ ॥

अलंघ्यं त्रिजगत्सारं यस्यानंतचतुष्टयं ।
नमस्तस्मै जिनेंद्राय महावीराय तायिने ॥ २ ॥

यस्य त्रिजगत्सारं निरावरणत्वादनंतसाधारणत्वाच्च लोकत्रयसारं त्रिजगद्भव्याराध्यमित्यर्थः । अनंतचतुष्टयं अनंतदर्शनज्ञानसुखवीर्याणि । अलंघ्यं आप्ताभासागम्यं अतत्त्वभ्यमस्ति । तायिने धर्मोपदेशकत्वेन भव्यत्राणाय तस्मै महावीराय वर्धमानस्वामिने जिनेंद्राय एकदेशेन कर्मारातीन् । जयंतीति जिना असंयतसम्यग्दृष्ट्यादयस्तेषामिंद्रस्वामी तस्मै नमः ॥

संख्याज्ञानप्रदीपेन जैनेंद्रेण महात्विषा ।
प्रकाशितं जगत्सर्वं येन तं प्रणमाम्यहं ॥ ६(!) ॥

जिनेंद्रेण जिनप्रणीतेन महात्विषा बहुप्रकाशेन येन संख्याज्ञानप्रदीपेन गणितशास्त्रज्योतिषा सर्वं षड्द्रव्यसमुदायरूपं जगत्प्रकाशितं । तमहं प्रणमामि ॥ ७(!) ॥ ०

The subject in hand is introduced, on fol. 2*b*, with some general remarks on the importance of arithmetic in a variety of human pursuits:

लौकिके वैदिके वा स्यात्तथा सामायिके ऽपि यः ।
व्यापारस्तत्र सर्वत्र संख्यानमुपयुज्यते ॥ ०

कामतंत्रे ऽर्थशास्त्रे च गंधर्वे नाटके ऽपि वा ।
रूपशास्त्रे महावैद्ये वास्तुविद्यादिवस्तुषु ॥

छंदोलंकारकाव्येषु तर्कव्याकरणादिषु ।
कलागुणेषु सर्वेषु प्रस्तुतं गणितं पुरा ॥

सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ ।
त्रिप्रश्ने चंद्रवृत्तौ च सर्वत्रांगीकृतं हि तत् ॥ ०

द्वीपसागरशैलानां संख्याव्यासपरिक्षिपाः ।
भवनव्यंतरज्योतिर्लोककल्पादिवासिनां ॥

नारकाणां च सर्वेषां श्रेणीबद्धेंद्रकोत्कराः ।
प्रकीर्णकप्रमाणाद्या बुध्यंते गुणितेन ते ॥

प्राणिनां तत्र संस्थानमायुरष्टगुणादयः ।
यात्राद्याः संहिताद्याश्च सर्वे ते गणिताश्रयाः ॥ ०

बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरं ।
यत्किंचिद्वस्तु तत्सर्वं गणितेन विना न हि ॥

तीर्थकृद्भ्यः कृतार्थेभ्यः पूज्येभ्यो जगदीश्वरैः ।
तेषां शिष्यप्रशिष्येभ्यः प्रसिद्धाद्गुरुपार्श्वतः ॥

जलधेरेव रत्नानि पाषाणादिककांचनं ।
शुक्तैर्मुक्ताफलानीव संख्याज्ञानमहोदधेः ॥

किंचिदुद्धृत्य तत्सारं वक्ष्ये ऽहं मतिशक्तितः ।
अल्पग्रंथमनल्पार्थं गणितं सारसंग्रहं ॥

I. (fol. 27*a*) *parikarmavidhi*; II. (fol. 56*a*) *kalāsavarṇavyavahāra*; III. (fol. 68*b*) *prakīrṇakavyavahāra*; IV. (fol. 75*b*) *trairāśikavyavahāra*; V. *vargasaṃkalitānayanasūtra* and *ghanasaṃkalitānayanasūtra*.

The colophons of the chapters run thus: इति सारसंग्रहे गणितशास्त्रे महावीराचार्यस्य कृतौ [प्रथमो°] व्यवहारः समाप्तः ॥

It ends: संयोगः [१२० + ३० + ६ + १ written one under the other] १५७ ॥ मूलं धनं स्यात् ॥ * ॥ संवत् १६३४ वर्षे माहमासे कृष्णपक्षे सप्तम्यां तिथौ बुधवासरे श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे । श्रीकुंदकुंदाचार्यान्वये भट्टारकश्रीसुमतिकीर्त्तिदेवास्तच्छिष्यब्रह्मसामलपठनार्थं श्रीजलदुर्गवास्तव्यश्रीहुंबडज्ञातीय उत्तरेश्वरगोत्रे श्रेष्ठश्रीसरवणभार्यावइजलदेसुतश्रेष्ठश्रीसरताणभार्यासोभागदेद्वि° रत्नादेतृती° सुहागदेसुतधनराजभार्याधनादे भ्रातृगदा एते स्वज्ञानावरणीकर्मक्षयार्थं लिखापि दत्तं ॥ [GAIKAWAR.]

2881.

596. Foll. 52; size 9½ in. by 4 in.; clear, modern Devanāgarī writing; nine lines in a page.

Gaṇitamañjarī, a treatise on arithmetic and mensuration, by *Gaṇeśa*, son of *daivajña Ḍhuṇḍhirāja*.

It begins:

श्रीमत्कल्पतरोस्तले ऽतिविलसत्सिंहासनाध्यासिनं
कर्णास्फालनमालिनं मदमिलन्मत्तालिमालाकुलं ।
वामे सिद्धिविलासिनीविलसितं लीलाकृतोर्ज्जितं
भाले बालसुधाकरं दशकरं वंदे करींद्राननं ॥ १ ॥

यत्पादतामरससंस्मरणप्रदीपात्
मोहांधकारनिकरो ऽतितरां निरस्तः ।
मन्मानमाशु सपदि सद्गुणभूषणाढ्यं
श्रीढुंढिराजपितरं स्वगुरुं नमामि ॥ २ ॥

पूर्वाचार्योदितगणितसत्कल्पभूमारुहाग्रे
प्रादुर्भूतामिव नवतरां मंजरीं श्रीगणेशः ।
कुर्वे [ऽ]पूर्वां गणितरचनां मंजरीं नाम रम्यां
मंदाक्रांतामपि मतिभरोत्कर्षहर्षाभिवर्षां ॥ ३ ॥

The MS. is incomplete. It ends: तदा सहस्रद्वितयमित २००० व्यासेन किमिति लब्धाः समत्र्यस्रादिभुजाः क्रमेण न्यासः ॥ इत्यादि द्वादशास्रपर्यंते क्षेत्रदर्शनान्यवगंतव्यानि ॥

[H. T. COLEBROOKE.]

2882.

252b. Foll. 66; size 12¾ in. by 4½ in.; good Devanāgarī writing of the latter part of last century; nine lines in a page.

Rekhāgaṇita-kshetravyavahāra, a treatise on geometry, composed, for king *Jayasiṃha* (in the early part of last century), by *Jagannātha*.

It begins:

गजाननं गणाधिपं सुरासुरार्चितं सदा ।
समस्तभक्तकामदं शिवासुतं सुखप्रभं ॥
वितंडचंड° ॥ १ ॥

In the Oxf. MS. no. 797 the first verse is likewise not counted. Cf. Beng. As. S. Journ., vi., p. 940. [H. T. COLEBROOKE.]

2883.

596B. Foll. 37; size 9½ in. by 4¼ in.; good, clear Devanāgarī writing of 1791 A.D.; nine lines in a page.

The last two chapters (xiii. and xiv.) of the *Gaṇitapāṭī-Kaumudī*, or *Gaṇitakaumudī*, a work on arithmetic, composed, in 1356 A.D., by *Nārāyaṇa Paṇḍita*, son of *Nṛisiṃha*.

These two chapters, called *aṅkapāśavyavahāra* and *bhadragaṇitavyavahāra* resp., are referred to in Colebrooke's Algebra of the Hindus, p. 113, footnote.

Ch. xiii. beg.: अथांकपाशमाह ॥

अथ गणकानंदकरं संक्षेपादंकपाशकं वक्ष्ये ।
नियतं नियतं मत्सरवंतो दुष्टाः कुगणका ये ॥ १ ॥

Ch. xiv. beg.:

त्रिभुवनगुरुणोपदिष्टमीशेन माणिभद्राय(!) ।
कौतुकिने भूताय श्रेढीसंबंधि सन्नगणितम् ॥ १ ॥

It ends:

आसीत्सौजन्यदुग्धांबुधिरवनिसुरश्रेणिमुख्यो जगत्यां
प्रख्यः श्रीकंठपादद्वयनिहितमनाः शारदाया निवासः ।
श्रौतस्मार्तार्थवेत्ता सकलगुणनिधिः शिल्पविद्याप्रगल्भः
शास्त्रे शास्त्रे च तर्के प्रचुरतरगतिव(वी)दिसिंहो
[नृसिंहः ॥ १ ॥

तत्सूनुरस्ति गणितार्णवकर्णधारः
श्रीशारदाप्रचुरलब्धवरप्रसादः ।
नारायणः पृथुयशा गणितस्य पाटी-
श्रीकौमुदीमिति मुदे गुणिनां प्रचक्रे ॥ २ ॥

यावत्सप्त कुलाचलाः क्षितितलं यावच्च सप्तार्णवा
यावत्सूर्यमुखा ग्रहाश्च गगनं यावद्ध्रुवस्तारकाः ।
स्थेयात्तावदियं सदोदितवती श्रीकौमुदी कौमुदी-
पूरः(?पूरैः) स्वच्छयशःप्रवाहसुभगा नारायणं दोस्कृत(!)
[॥ ३ ॥

नारायणाननसुधाकरमंडलोत्थां
चातुर्यसूक्तिरचनामृतबिंदुवृंदीं
प्रीत्यैव सज्जनचकोरगणाः पिबंतु
श्रीकौमुदीं मुदित[–]कुमुदः सदैतां ॥ ४ ॥

गजनगरविमितशाके १२७८ दुर्मुखवर्षे च बाहुले मासि ।
धातृतिथौ कृष्णदले गुरौ समाप्तिं गतं गणितं ॥ ५ ॥

इति श्रीसकलकलानिधिनृसिंहनंदनगणितविद्याचतुराननारायणपंडितविरचितायां गणितपाट्यां कौमुद्याख्यायां भद्रगणितं नाम चतुर्दशो व्यवहारः ॥ श्रीसंवत् १८४८ शाके १७१२ दुंदुभिनामसंवत्सरे माघमासे कृष्णे पक्षे तिथौ ४ गुरुवासरे समाप्तं ॥ [H. T. COLEBROOKE.]

2884.

1557. Foll. 7; size 8⅜ in. by 2¾ in.; written, in the Bengalī character, in the earlier part of last century; eight lines in a page.

Trivikramaśataka, an astronomical treatise, in a hundred *ślokas,* by *Trivikrama,* son of *Nārayaṇa,* and younger brother of *Jñānamalla.*

It begins:

नमस्कृत्य परं ब्रह्म गणकेन्दुस्त्रिविक्रमः ।
मुनिप्रणीतमखिलं व्यवहारं प्रवक्ष्यति ॥ १ ॥

नन्दा भद्रा जया रिक्ता पूर्णेति च पुनः पुनः ।
शुक्रज्ञारार्किजीवेषु सिद्धाः स्युस्तिथयः क्रमात् ॥ २ ॥

त्याज्याः पञ्च बुधे ऽर्के ऽष्टौ सर्वेषु त्र्यधिका दश ।
तिथिवारयुतौ तौ चेत् स्पृशेतां त्रीन् परस्परं ॥ ३ ॥

विरुद्धनामयोगेषु साभिजिद्विषमर्क्षगः ।
अर्कादिन्दुस्तदा योगो [ऽ]निन्द्य एकार्गलातिदः ॥ ४ ॥

साध्यहर्षणशूलानां वैधृतिव्यतिपातयोः ।
यद्भं गण्डस्य चान्ते स्यात् तत्पातेन निपातितं ॥ ५ ॥

It ends:

नारायणस्य तनयो ज्ञानमल्लानुजो द्विजः ।
त्रिविक्रमः शतश्लोकैर्व्यवहारममुं व्यधात् ॥ १०१ ॥

इति त्रिविक्रमशतकं समाप्तं ॥

[H. T. COLEBROOKE.]

2885.

1051a. Foll. 18; size 8¼ in. by 3 in.; good, modern Devanāgarī writing; seven lines in a page.

Saurapaurāṇikamatasamarthana, being an attempt to reconcile the cosmical views of the *Purāṇas,* regarding our globe, with those of the *Sūryasiddhānta;* with a commentary; compiled by *Nīlakaṇṭha,* son of *Govinda Sūri* of the *Caturdhara* family.

It begins: पौराणिकज्योतिषिकमतयोर्भुवनकोशे विरोधसमाधानं वक्तुं प्रतिजानीते । प्रणम्येति ॥

प्रणम्य श्रीकृष्णं मुनिमखिलपौराणिकगुरुं
प्रवक्ष्ये रोदस्योस्तदभिमतमाकारममलं ।
यथा शृंगोन्नत्यप्रमुखमुपपद्येत सकलं
यथा वेदव्यासव्यवहृतिविरोधश्च न भवेत् ॥ १ ॥ °

It ends:

इति संक्षिप्य पौराणसौरसिद्धांतमार्गयोः ।
भूगोलविषये साम्यं वर्णितं बुधतुष्टये ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः नीलकंठस्य कृतौ सौरपौराणिकमतसमर्थने रोदस्योः प्रकरणं समाप्तम् ॥ [H. T. COLEBROOKE.]

2886–2888.

127, 782, 783. Foll. 408, numbered 1-161 (fol. 1 of which is wanting), 162-317, 1-92 resp.; size 9¾ in. by 4¾ in.; good Devanāgarī writing of 1792 A.D.; ten lines in a page.

Siddhāntasārvabhauma, also called *Siddhānta-tattvārtha*, a versified compendium of theoretical astronomy, by *Munīśvara*, surnamed *Viśvarūpa*, son of *Raṅganātha;* with a copious commentary (*vivaraṇa*) by the same author.

The MS. contains only the *pūrvārdha* of the work. [A.]

The commentary, acc. to MS. B, begins (somewhat corrected):

यद्ब्रह्माद्यमरैर्मुनीश्वरगणैर्ध्यानेन वेदार्थत:
किंचिन्निर्गुणमस्ति नित्यसुखधीरूपं महो निश्चितं ।
तद्ब्रह्माखिलसृष्टिकारणमथाज्ञानात्ममायावशात्
षट्शास्त्रैकविचारगम्यमनिशं बोध्यं व्यनक्तु स्फुटं ॥ १ ॥
यशोदयांगीकरणारतोर्थं(?)
श्रीरंगनाथं कमलाधिनाथं ।
मुनीश्वरख्यातपदद्वयाज्ञं
रामानुजं तातमिवानतो ऽस्मि ॥ २ ॥ ° ३ ॥
श्रीसार्वभौम[ज]हँगीरसुनंदनो ऽयं
श्रीशाहजाहँ धरणीपुरुहूत एवं ।
निष्कंटकां वसुमतीं प्रविधाय तस्या:
संरक्षणार्थमथ सेह गतासने ऽस्मिन्(?) ॥ ३(!) ॥
माणिक्यमुक्ताफलनीलवज्र° ॥ ४ ॥
मंगलप्रमिततारिखादिने
वासरे त्रिनयनो भवस्य च(?) ।
सप्तवह्निवियदिंदुसंमिते १०३७
पारसीकशशिमानसनाब्दे:(?) ॥ ५ ॥
बहमनमासि शराक्षि२५तारिखायां
दिनकरमानवशाच्छुभे दिने ऽस्मिन् ।
दिनकरभूमिजमंडलैक्यकालाद्
गणकनिवेदितयाप्तरामनाम्ना(?) ॥ ६ ॥ ° ८ ॥
उपाविशत्साधुजनै(?°ने) कृपालु:
संगीतचातुर्यकलानुरक्त: ।
दीर्घायुषस्तस्य सुराज्यकाले
श्रीसार्वभौमो रचितो मयायं ॥ ९ ॥
सप्तस्वरगुणाशो१०३७न: शेषसिद्ध२४हनंदनं(!) ।
सप्तांगै६७र्येग्नलब्धाधिमासोनकं समा:(!) ॥ १० ॥
सिद्धांतारि(?°नां)सार्वभौममेनं रामं गुरुं भजन् ।
विवृणोमि निजग्रंथं परबुद्ध्याज्ञतुष्टये ॥ ११ ॥
ग्रंथारंभाव्यवहितपूर्वक्षणे° ग्रंथादौ निबध्नाति ।
विश्वं व्याप्य स्थितो य: सकलसुरनरैर्वंदित: श्रीनिवासस्
तेजोमूर्ति: कृपालुर्मुनिवरनिकरैर्ज्ञानदृष्ट्यैव गम्य: ।
ध्वांतं हत्वा स बोधं सुखकरममितं सच्चिदानंदरूप:
स्वांते तद्भक्तियुक्ते व्यपगतदुरिते सर्वदा मे व्यनक्तु ॥ १ ॥

The second verse of the text runs thus:

ब्रह्माद्या विबुधगणा: स्वकार्यसिद्ध्यै
यं विघ्नद्रुमदलनोद्धुरं प्रणम्य ।
जायंते सपदि कृताखिलार्थसंघास्
तं दंतावलवदनं नमामि नित्यं ॥ २ ॥

See Rāj. Mitra, Notices, v., p. 171.

From the introduction the work would thus appear to have been completed (or begun) on the 25th day of the Persian month Bahman of the lunar year 1037, corresponding to 1627 A.D.; or the first year of the reign of *Shāh Jehān*, the son of *Jehāngīr*, both of whom are alluded to above.

The *pūrvārdha* consists of the following six chapters (*adhikāra*): 1. *madhyagrahānayana* (*madhyakhagāgama*), vol. i., fol. 69*a*; 2. *spashṭa-grahānayana*, vol. ii., fol. 183*b*; 3. *tripraśna*, ib. fol. 242*b*; 4. *grahacchāyā*, ib. fol. 293*b*; 5. *śriṅgonnatyadhikāra*, ib. fol. 317*b*; 6. *graha-yogādhikāra*, vol. iii., in four sections.

According to the epilogue the *uttarārdha* was to consist of two chapters, treating of *yantra* and *praśna* respectively, but it does not appear certain that the author ever completed the work. [H. T. COLEBROOKE.]

2889.

1816. Foll. 80; size 12¼ in. by 5 in.; indifferent, modern Devanāgarī writing; 13 lines in a page.

A fragment of the same work. [B.]

It consists of the first *adhikāra* (fol. 46b), and part of the second, as far as v. 176 (fol. 125b, l. 1 of A), where it breaks off abruptly at the end of a leaf.

The MS. is very carelessly written, and full of blunders. [Dr. John Taylor.]

2890, 2891.

34, 35. Foll. 294 (viz. 1–147, 147–295, no. 107 having been passed over); size 9¾ in. by 4¾ in.; good Devanāgarī writing of 1792 A.D.; nine lines in a page.

Siddhāntatattvaviveka, a course of astronomy, founded mainly on the *Sūryasiddhānta*, composed, in Śaka 1580 (A.D. 1658), by *Kamalākara* of Golagrāma, near Devagiri (Dowlatabad), son of *Nṛisiṃha*, grandson of *Kṛishṇa*, great-grandson of *Divākara*, and pupil of (his elder brother) *Divākara* (*Sāṃvatsarācārya*).

It begins:

ब्रह्मांडोदरमध्यगावनिजलाग्न्यूर्ध्वेंदुपूर्वग्रह-
ऋक्षोर्ध्वस्थप्रवहांतगोलरचना सृष्टिर्यथावस्थिता ।
काले ऽस्मिन्गहने ऽव्यये ऽस्ति सततं यस्मादियं तज्जय-
त्वाद्यं निर्गुणमीशमव्ययपरब्रह्मैकतत्त्वं शुभं ॥ १ ॥ ०

अतः सांवत्सराचार्यं गुरुं श्रीमद्दिवाकरं ।
नत्वा नृसिंहजो ऽर्कस्य मतात्श्रीकमलाकरः ॥ ११ ॥

कृती तत्त्वविवेकाख्यं पूर्वास्पृष्टं सवासनं ।
सिद्धांतं गोलवित्तुष्ट्यै करोति स्वधियोत्तमः ॥ १२ ॥ ०

The work has been edited, by *Paṇḍit Sudhākara Dūbē*, in the Benares Sansk. Series (1885).

It ends with a genealogical account of 28 verses, beginning:

अथात्र सार्धांबरदस्र२०।३०संख्य-
पलांशकैरस्ति च दक्षिणस्यां ।
गोदावरीसौम्यविभागसंस्थं
दुर्गं च यद्देवगिरीति नाम्ना ॥
प्रसिद्धमस्मान्नृप१६योजनैः प्राग्
याम्यांतराशास्थितपार्श्वयोरिव ।
विदर्भदेशांतरगास्ति रम्या
राज्ञां पुरी तन्नतदेशमध्ये ॥
तस्यास्तु किंचित्परभाग एव
सार्धद्वितुल्यैः किल योजनैश्च ।
गोदावरीवर्ति सदैव गंगा
या गौतमप्रार्थनयात्र सिद्धा ॥
अस्याः सतां सौम्यतटोपकंठ-
ग्रामोऽस्ति गोलाभिधया प्रसिद्धः ।
तथैव याम्ये पुरुषोत्तमाख्या
पुरी तयोरंतरगा स्वयं सा ॥ ०

वेदांतशास्त्राभ्यसनेन काश्यां
यः पुण्यराश्यां तनुमुत्ससर्ज ।
अस्यार्यवर्यस्य दिवाकरस्य
श्रीकृष्णदैवज्ञ इति प्रसिद्धः ॥
बभूव पुत्रः सुतरां पवित्रः सत्तीर्थकर्ताखिलशास्त्रवेत्ता ।
तज्जस्तु सद्गोलविदां वरिष्ठो नृसिंहनामा गणकार्यवंद्यः ॥
बभूव येनात्र च सौरभाष्यं शिरोमणेर्वार्त्तिकमुत्तमं हि ।
स्वार्थं परार्थं च कृतं त्वपूर्वं सद्युक्तियुक्तं ग्रहगोलतत्त्वं ॥
तज्जस्तु तस्यैव कृपालवेन स्वज्येष्ठसद्बंधुदिवाकराख्यात् ।
सांवत्सरार्याद्गुरुतः प्रलब्धशास्त्रावबोधो गणकार्यतुष्ट्यै ॥
दृग्गोलभक्षेत्रनवीनयुक्त्या पूर्वोक्तितः श्रीकमलाकराख्यः ।
समस्तसिद्धांतसुगोलतत्त्वविवेकसंज्ञं किल सौरतत्त्वं ॥
खनागपंचेंदुशके१५८०व्यतीते सिद्धांतमार्याभिमतं समग्रं ।
भागीरथीसौम्यतटोपकंठवाराणसीस्थो रचयांबभूव ॥ ०

For a similar statement see *Nṛisiṃha's Siddhāntaśiromaṇi-Vāsanāvārttika* (nos. 2857-8).

Foll. 1–95 have one or other of the marginal marks तत्व·सिद्धां, त·सि·, त·सि·वि·, सि·तत्व·, सि·वि·

The MS. was copied by one *Śivabandhu* at Brahmaghāṭa on the Ganges.

[H. T. Colebrooke.]

2892.

1877. Foll. 39 (and an extra leaf after fol. 12); size 12 in. by 4 in.; indifferent, modern Devanāgarī writing; 10–13 lines in a page.

A fragment of the same work; consisting of the *grahaspashṭādhikāra* (pp. 51–145 of Ben. edition).

It begins: **खतींद्रियद्वैगगनेचराणां०**; and breaks off abruptly at the end of the last leaf, a few lines after the completion of the chapter.

[DR. JOHN TAYLOR.]

2893.

520a. Foll. 58; size 9½ in. by 4 in.; fairly good, modern Devanāgarī writing; seven lines in a page.

Śeshavāsanā, a supplement to *Kamalākara's Siddhāntatattvaviveka*, by the same author; included in the Benares edition of the latter work.

It begins:

जगत्सुसृष्टकृद्ब्रह्मा यदहंकारतो ऽभवत् ।
तन्नौमि वाक्प्रदं देवं ज्योतिषां गतिकारणं ॥ १ ॥
यद्यत्स्वकल्पितं तत्तद्बहुधोक्तं सवासनं ।
सिद्धांते यत्र तस्याहं वासनां वच्म्यथाधुना ॥ २ ॥

It ends:

स्वोक्ततत्त्वविवेकस्य मयेयं शेषवासना ।
कथिता तद्विदां प्रीत्यै सुबोधोत्कृष्टजीविनां ॥

इति श्रीसकलगणकसार्वभौमश्रीमन्नृसिंहात्मजकमलाकर-विरचिता शेषवासना संपूर्णा ॥

[H. T. COLEBROOKE.]

2894.

2292. Foll. 24; size 4to, 13 in. by 10 in.; fair, modern Devanāgarī writing; 23 lines in a page.

The same work; being a reproduction of the preceding MS. [CALCUTTA.]

2895.

2426. Foll. 41; size 9 in. by 5½ in.; good, clear Devanāgarī writing; 9 and 10 lines in a page.

Jyotisharatnamālā, or simply *Ratnamālā*, an astronomical compendium in 20 chapters (*prakaraṇa*) by *Śrīpati*, purporting to be extracted from the *Ratnakosha*.

It begins: **प्रभवविरतिमध्यज्ञानवंध्यानितांतं०** See Aufrecht, Cat. Bodl., nos. 782, 783.

It ends:

इति ललितसुवृत्तां निर्मलां [रत्नमालाम्]
उदहरदधिकार्थां सद्गुणां रत्नकोशात् ।
निजगुरुपदभक्तः श्रीपतिः शश्वदेषं
चतुरगणककंठे राजतामुज्ज्वलश्रीः ॥

इति श्रीश्रीपतिविरचितायां ज्योतिषरत्नमालायां देवप्रतिष्ठाप्रकरणं विंशतितमं संपूर्णं ॥

संवत् १७३० वर्षे चैत्रशुदि २ रवौ रत्नमाला समाप्ता ॥

[GAIKAWAR.]

2896.

2041c. Foll. 36; size 11 in. by 5¼ in.; good, modern Devanāgarī writing; ten lines in a page.

Jyotisharatnamālā.

This MS. ends as follows:

इति ललितसुवृत्तां० श्रीः ॥ १२ ॥
भ्रातरद्यतनविप्रनिर्मितं
शास्त्रमेतदिति मादृषात्मज ।
आगमो ऽयमृषिभाषितार्थतो
नापरं तदपि कीर्तितं मया ॥ १३ ॥
सुव्रतया श्रीपतिलब्धयानया
कंठस्थया ज्योतिषरत्नमालया ।
अलक्षणो ऽप्यर्थपरिच्युतो ऽप्यलं
सभासु भूम्यां गणको विराजते ॥ १४ ॥

[GAIKAWAR.]

2897.

2119. Foll. 148; size 9¼ in. by 5¼ in.; legibly written, in Devanāgarī, about 1500 A.D.; 13–15 lines in a page.

Śrīpati's Jyotisharatnamālā, accompanied by a commentary (*vivaraṇa*), by *Mahādeva*, son of *Lūṇiga*. Very incorrect.

The commentary begins:

प्रणम्य भानुं त्रिजगन्नमस्यम्
अशेषसर्गस्थितिनाशहेतुं ।
दैवज्ञबोधाय मृदु[:] स्फुटार्थं
व्याख्यायते ज्योतिषरत्नमाला ॥ १ ॥

सामाशर्मप्रसादेंदुविवृद्धामतिवारिधिः(!) ।
माहार्थां विवृणोम्येष रत्नमालामनंतरं ॥ २ ॥

The colophons are in the form of the following stanza:

शाण्डिल्यप्रमाणप्रवणपटुमतेर्वेदवेदांगवेत्तुः
सूनुः श्रीलूणिगस्याच्युतचरणनतः श्रीमहादेवनामा ।
तत्प्रोक्ते रत्नमालारुचिरविवरणे सज्जनांभोजभानौ
स्वर्भानौ दुर्जनेंदोः प्रकरणमगमत् [प्राक्तनं वत्सरादिः]॥

At the end a leaf, which contained the concluding portion of the comment on the last verse, has been lost.

The MS. has in some parts suffered from damp; and foll. 97–100, 112–115 are somewhat worm-eaten. [GAIKAWAR.]

2898.

1014. Foll. 79; size 12 in. by 4 in.; small, neat Bengalī handwriting of about 1650 A.D.; ten lines in a page.

Sārāvalī, a systematic treatise on astronomy, composed, in different metres, by *Kalyāṇavarman*, ruler of Vyāghrataṭī(?). [A.]

It begins:

यस्योदये जगदिदं प्रतिबोधमेति
मध्यस्थिते (मध्यंगते B.) प्रसरति प्रकृतिक्रियासु ।
अस्तंगते स्वपिति चोत्कुसितैकमात्रं[1]
सूर्यः (भानुः B.) स एव जयति प्रकटप्रभावः[2] ॥

विस्तरकृतानि मुनिभिः परिहृत्य[3] पुरातनानि शास्त्राणि।
होरातत्त्वं रचितं वराहमिहिरेण संक्षेपात् ॥

राशिदशावर्गनृपतियोगायुर्दायगोचरदशानां[4] ।
विषयविभागः स्पष्टः कर्तुं न च शक्यते[5] यतस्तेन ॥

अत एव विस्तरेभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः ।
सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्धृत्य[6] ॥

देवग्रामपयःप्रपोषणबलाद्व्याघ्रतटीश्वरं
कीर्तिः सिंहविलासिनीव[7] सहसा यस्येह भङ्क्तागता ।
होरां व्याघ्रतटीश्वरो रचयति स्पष्टां स सारावलीं
श्रीमान् शास्त्रविनिर्मलीकृतमनाः कल्याणवर्मा कृती॥

होरातृष्णार्तानां शिष्याणां स्फुटतराय शिशिरजला ।
कल्याणवर्मशैलादिव सारावली प्रसृता ॥

इति प्रभुकल्याणविरचितायां (thus only once) सारावल्यां शास्त्रावतारः प्रथमः ॥

The subject is treated in 39 (37 B.) chapters.

It ends: इति श्रीकल्याणवर्मविरचितायां सारावल्यां वियो[नि]जन्माध्याय ऊनचत्वारिंशत्तमः ॥ गोविन्दचरणद्वन्द्वे भक्तिर्भवतु मादृशः । आसा – here the MS. breaks off at the end of the leaf.

For other MSS. see Rāj. Mitra, Notices, i., p. 191; Bikaner Cat., p. 335.

The first leaf of a Nepalese MS., dated 1286 A.D., has been reproduced in Plate xxxii. of the Oriental Series of the Palæographical Society's publications. [H. T. COLEBROOKE.]

2899.

2508. Foll. 164, four of which (35–37, 164) are missing; size 10½ in. by 5¾ in.; Devanāgarī writing; 9–11 lines in a page.

The same work. [B.] [GAIKAWAR.]

2900.

1901. Foll. 59 and 2; size 11½ in. by 5½ in.; fair Devanāgarī writing of 1812 A.D.; thirteen lines in a page.

---

[1] चोत्रमितैकमात्रं A.; चोत्स्वसि° B.; बोधवि° Bik.; वोद्वसि° R. M.

[2] ° स्वभावः B.

[3] संवीक्ष्य B.

[4] ?°योगामर्द्धाय° A.; राशिवर्गभूपतियोगायुर्दायनाभसादीनां B.; राशिदशावर्गो नृपतियोगा युद्धयोगाश्चरदशायां R. M.

[5] स्पष्टं कर्तुमशक्यो B.

[6] B. omits this verse.

[7] सिद्ध° B.

Jyotishasāra, a popular treatise on judicial astronomy, by *Śukadeva*, son of *Lakshmaṇabhaṭṭa Sūri*, with an *anukramaṇikā* appended to it on the last two leaves.

It begins : अथ ज्योतिषप्रारंभः ॥

नानाग्रंथान्समालोक्य गणकानां प्रसिद्धये ।
कथ्यते शुकदेवेन ग्रंथो ज्योतिषसारकः ॥ १ ॥
तिथिवारं च नक्षत्रं योगं करणमेव च ।
पंचांगं शृणु यत्नित्यं द्विजादैश्वर्यवर्धनं ॥ २ ॥

The version of it published repeatedly at Bombay differs a good deal in details from the text of this MS. [Dr. John Taylor.]

2901.

2002. Foll. 55; size 9⅜ in. by 4 in.; fair Devanāgarī writing of 1652 A.D.; eight lines in a page.

Siddhāntasundara, a manual of the rules of astronomical calculations, by *Jñānarāja*, son of *Nāganātha*. [A.]

It begins :

दिङ्मातंगसुतुंगपंचवदनं विघ्नैकलंबोदरं
चूडारत्नसहस्रभूधरमहाहारं सुनीलांबरं ।
स्वांतध्वांतहरं कलानिधिधरं कोटीनरूकसुंदरं
वाराहोपमवाहनं गणपतिं वंदे परं शंकरं ॥ १ ॥

अथ युगैः शशिशैल७१मितैर्मनुर्
विधिदिने मनवस्तु चतुर्दश१४ ।
कृतसमासम१७२८००० संधियुगैश्च
तैस्त्रिसमयेषु सहस्रयुगं दिनं ॥ २ ॥ °

The work is divided into the following chapters (only the first two of which are numbered): 1. (29 vv.) *madhyamādhikāraḥ prathamaḥ* (*madhyagrahānayanādh.* B.), fol. 9*b*; 2. (48 vv.) *spashṭīkaraṇādhyāyo dvitīyaḥ* (*sphuṭagatisādhana* B.), fol. 14*a*; 3. (43 vv.) *tripraśnādhyāya*, fol. 19*a*; 4. (7 vv.) *parvasambhūtināmādhyāya*, fol. 20*a*; 5. (40 vv.) *candragrahaṇādhikāra*, fol. 23*b*; 6. (16 vv.) *sūryagrahaṇādhikāra*, fol. 25*a*; 7. (18 vv.) *grahodayāstādhikāra*, fol. 27*a*; 8. (21 vv.) *nakshatracchāyāghaṭīsādhanādhikāra*, fol. 29*a*; 9. (18 vv.) *śriṅgonnatyadhikāra*, fol. 30*b*; 10. (9 vv.) *grahayogādhyāya*, fol. 31*b*; 11. (10 vv.) *tārāchāyābhadhruvādyam*, fol. 32*a*; 12. (14 vv.) *pātādhyāya*, fol. 33*b*; 13. (78 vv.) *golādhyāye bhuvanakośādhikāraḥ*, fol. 41*a*; 14. (31 vv.) *golādhyāye madhyabhuktivāsanādhyāyaḥ*, fol. 43*b*; 15. (22 vv.) *golādhyāye chedyake yuktiḥ*, fol. 45*b*; 16. (16 vv.) *golādhyāye maṇḍalavarṇanam*, fol. 47*a*; 17. (44 vv.) (*golādhyāye*) *yantramālā*, fol. 51*a*; 18. (35 vv.) *golādhyāye ṛituvarṇanam*, ends :

इत्थं श्रीमन्नागनाथात्मजेन
प्रोक्ते तंत्रे ज्ञानराजेन रम्ये ।
ग्रंथागाराधारभूते प्रभूते
गोलाध्याये वर्णनं षड्‌तूनां ॥ ३५ ॥

इति श्रीसकलसिद्धांतवासनाविचारचतुरचित्तचमत्कृतिकारिणि सत्तंत्राधारे सिद्धांतसुंदरे ऋतुवर्णनं नाम पंचमो(!) ऽध्यायः ॥ संपूर्णमेतत् ॥ स्वस्ति श्रीमन्नृपशालिवाहनशके १५७४ श्रावणशुक्लैकादश्यां गुरौ काशिभट्टेन लिखितो ऽयं सुंदरसिद्धांतः ॥

The treatise is mentioned in the *Sūryaprakāśa* (above no. 2823), composed by the author's son in A.D. 1541.

For the *golādhyāya* see Rāj. Mitra, Notices, v., p. 86; for a *bījagaṇita*, Berl. Cat., no. 831. [Dr. John Taylor.]

2902.

2114b. Foll. 37; size 9½ in. by 4½ in.; legibly written in Devanāgarī, by several hands, in 1782 A.D.; 9–11 lines in a page.

The same work. [B.] [Gaikawar.]

2903.

2408c. Foll. 10; size 7½ in. by 4⅜ in.; clear, modern Devanāgarī writing; 9 or 10 lines in a page.

A portion of the *golādhyāya* of the *Siddhāntacintāmaṇi*, by *Sadānanda*, son of *Vyāsāvaṭakakīka* (?).

The fragment begins: बाणचंद्रा ॥ १३ ॥ this chapter consisting of 76 verses (without colophon).

Then follows another chapter, of 18 verses, beginning भाग्यश्विन्यादीनि धायीणि °

Then another chapter, of 14 verses, beg. कुलालचक्रं दंडेन °

Then another chapter, of 15 verses, beg. पंचांगतो गतिं ज्ञात्वा °

It ends:

> एतज्ज्ञात्वा मया पर्वे सूर्यचंद्रांतरे कृते ।
> बालानामश्रमेणैव ज्ञायते पर्वसंभवः ॥ १४ ॥
>
> रविभ्रमति केतवः सुदीर्घवृत्तगामिनः ।
> समीपगाः प्रदृश्यते विदूरगा न दृश्यते ॥ १५ ॥

इति श्रीव्यासावटंककश्रीकात्मजसदानंदविरचितो गोले सिद्धांतचिंतामणिः ॥

Then follow two more verses: संकाशेशेंद्रभूपाए चंद्रा दूरतस्त्वजात्(!) । ° [GAIKAWAR.]

2904.

1492a. Foll. 25; size 14 in. by 5 in.; indifferent, modern Bengālī handwriting; seven lines in a page.

Siddhāntamañjarī, another manual of astronomy, composed (?in 1609 A.D.) by *Mathurānātha Vidyālaṃkāra*.

It begins:

> प्रणिपत्य जगद्विलोचनं रविसिद्धान्तमनोज्ञमञ्जरीं ।
> अवहुज्ञसुखावबुद्धये मथुरानाथकृती विनिर्ममे ॥
>
> इष्टः शकाब्दः क्षितिरामबाण-
> रूपै१५३१र्विशुद्धः कथितो [ऽ]ब्दपिण्डः ।
> याराद्दिवृन्दं विषुवस्य रामो
> नवक्षितो पक्षशरो युगाग्नी३।१९।५२।३४ ॥

It ends (fol. 12b):

> सिद्धान्तकल्पधरणीरुहमञ्जरीयं
> कर्णे कृताकृतधियां मुदमातनोतु ।
> यत्र स्फुटा दिनमणीन्दुमुखाः प्रकामम्
> उद्बोधयन्ति मणयस्तमसा निमग्नान् ॥
>
> इति श्रीमथुरानाथविद्यालङ्कारनिर्मिता ।
> सिद्धान्तमञ्जरी पूर्णा शत्रुजिन्नृपसंसदि ॥

Then follow thirteen leaves of astronomical tables. [H. T. COLEBROOKE.]

2905.

1528a. Foll. 17; size 10 in. by 4 in.; clear Devanāgarī writing of about 1650 A.D.; eight lines in a page.

Yantrarāja, or *Yantrarājāgama*, also called *Suyantrāgama* (foll. 8a and 17a) and *Sadyantra*, a treatise in five chapters on the construction and the use of the armillary sphere in the calculation of celestrial and terrestrial longitudes and latitudes, by *sūri Mahendra*,* the pupil of *Madana Sūri*, the court astrologer of the ruler of Bhṛigupura.

It begins:

> श्रीसर्वज्ञपदांबुजं हृदि परामृश्य प्रभावप्रदं
> श्रीमंतं मदनाख्यसूरिसुगुरुं कल्याणकल्पद्रुमं ।
> लोकानां हितकाम्यया प्रकुरुते सद्यंत्रमत्यद्भुतं
> नानाभेदयुतं चमत्कृतिकरं सूरिर्महेंद्राभिधः ॥ १ ॥
>
> अपारे संसारे कति कति बभूवुर्न चतुराः
> परं तेर्देर्बोधं गणितमरचि प्रौढमतिभिः ।
> ततः स्वल्पं सारं विशदमिदमत्यंतसुगमं
> वितन्वे ऽहं शास्त्रं सुहृदयहृदानंदकृतये ॥ २ ॥
>
> कृप्तास्तथा बहुविधा यवनैः स्ववाण्या
> यंत्रागमा निजनिजप्रतिभाविशेषात् ।
> तान्वारिधीनिव विलोड्य मया सुधावत्
> तत्सारभूतमखिलं प्रणिगद्यते ऽत्र ॥ ३ ॥
>
> यथा भटः प्रौढरणोत्कटो ऽपि
> शस्त्रैर्विहीनः परिभूतिमेति ।
> तद्वन्महाज्योतिषपंडितो ऽपि
> यंत्रेण हीनो गणकस्तथैव ॥ ४ ॥

---

* In *Malayendu's* commentary he seems to be described as the head astrologer of some potentate of the name of *Fīroz*, possibly the famous *Fīroz Shāh*, the *Tughluk* sultan of Delhi (1351–88 A.D.).

Speaking of the seven zones (κλίμα) between the equator and the north pole, the author remarks (fol. 3*b*, l. 1): तेषां यवनभाषया इकलेमेति [*i.e.* اقليم] संज्ञा। where *Yavana* evidently means the Muhammadans, not the Greeks.

The titles of the five chapters are: 1. *gaṇita* (fol. 8*a*); 2. *ghaṭana* (fol. 8*b*); 3. *yantraracana* (fol. 11*a*); 4. *yantraśodhana* (fol. 11*b*); 5. *vicāraṇā* (fol. 17*a*). The second half of the MS. contains many marginal glosses.

It ends (cf. Aufrecht, Flor. MSS., no. 269):

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः।
तदीयपदशालिना विरचिते सुयंत्रागमे
महेंद्रगुरुणोदिता ऽजनि विचारणा यंत्रजा॥

इति श्रीमहेंद्रसूरिविरचिते यंत्रराजागमे विचारणाध्यायः पंचमः॥ समाप्तो ऽयं यंत्रराजग्रंथः॥

[H. T. COLEBROOKE.]

2906.

2343b. Foll. 60; size 10 in. by 4½ in.; fair, modern Jaina Devanāgarī writing; thirteen lines in a page.

A commentary (*ṭīkā* or *vyākhyāna*) on *Mahendra Sūri's Yantrarāja* (the text of which is given in full), by his pupil *sūri Malayendu*; with copious tables for calculations.

It begins:

प्रणम्य सर्वज्ञपदारविंदं सूरेर्महेंद्रस्य पदांबुजं च।
तनोति तद्गुंफितयंत्रराजग्रंथस्य टीकां मलयेंदुसूरिः॥

अथ प्रथमतः प्रचिकीर्षितस्य सकलगणितसारभूतस्य यंत्रराजग्रंथस्य निरंतरांतराय ० ग्रंथाभिधेयमभिधत्ते ग्रंथकारः। श्रीसर्वज्ञ ०॥

It ends:

श्रीपीरोजमहेंद्रसर्वगणकप्रष्ठो* महेंद्रप्रभुर्
जातः सूरिवरस्तदीयचरणांभोजैकभृंगाकृतिः।
सूरिश्रीमलयेंदुना विरचिते ऽस्मिन् यंत्रराजागम-
व्याख्याने प्रविचारणादिकथनाध्यायो गतः पंचमः॥
[६९॥ ०

इति श्रीयंत्रराजस्य टीका पूर्णेयमद्भुता।
स्वान्यज्ञानकृते सम्यग् लिखिता प्रचुरादरात्॥ १॥
संवत् सिद्धगुणाष्टकायरजनीराजांकसंज्ञे वरे
मासि प्रौष्ठपदे तिथौ च दशमी पुष्यार्कयोगागतौ।
श्रीमद्भूपनिवासरम्यविभवे बहीनपूःपत्तने†
नित्यं नंदतु पुस्तकं च सदिदं यावद्रमूर्येंदवः॥ २॥

That the *Pīroja* in whose service *Mahendra Sūri* was, is meant for the famous *Fīroz Shāh*, the founder of the fortified town Ḥiṣār Fīrozah and of Fīrozābād,‡ is made more than probable by an incidental allusion to that historical character on fol. 14*b*. Speaking of the seven regions between Ceylon, which is supposed to lie on the equator, and the north pole, the longitudes of a number of Indian, Persian and other Asiatic towns within the first four zones, up to deg. 52, are noted down, and amongst them Hisāra Pīrojābāda is mentioned in the following terms: श्रीपीरोजनृपवासितहिंसारपीरोजबादे २६।४८। where, however, the other MS. reads: श्रीपेरुजानृपांकितहिंसारपेरोजाबादे। The examples (on foll. 22*a* and 58*b*) chosen, by way of illustration, from the Saṃvat years 1427 and 1434 (A.D. 1370 or 1377), would agree very well with *Fīroz Shāh's* time.

The five chapters end on foll. 38*a*, 39*b*, 45*a*, 46*a*, 60*a*.

The copyist calls himself *gaṇi Śivavijaya*, brother of *gaṇi Śāntivijaya*, living in the spiritual reign of the Jaina teacher *Vijayānanda Sūrīśvara*.

Cf. Rāj. Mitra, Cat. of Bikaner MSS., p. 351.

[GAIKAWAR.]

---

* Var. ll. श्रीपीरोजसहेंद्र ० and श्रीपीरोजशकेंद्र ०

† ? i.e. برهانپور, Berhampore, the sudder station of Moorshedabad?

‡ Cf. Sir H. M. Elliot, Hist. of India, iii., pp. 299–302, 354. *Firozābād* was founded in 1354, the third year of the emperor's reign.

2907.

2343a. Foll. 23; size 10 in. by 4½ in.; fair, modern Devanāgarī writing; fourteen lines in a page.

Another imperfect copy of *Malayendu's Yantrarājaṭīkā*, independent of the preceding MS. of which it covers the larger portion, as far as fol. 43*b*, l. 3. [GAIKAWAR.]

2908.

1845. Foll. 40 (and an extra leaf between 14 and 15); size 11 in. by 5¼ in.; fairly good Devanāgarī writing; thirteen lines in a page.

The same work. A modern and not very accurate copy. [DR. JOHN TAYLOR.]

2909.

1989. Foll. 16; size 7½ in. by 4¾ in.; fairly good, modern Devanāgarī writing; twelve lines in a page.

Yantracintāmaṇi, another treatise on the use of the armillary sphere, in 26 verses, composed by *Cakradhara*, son of *Vāmadeva* or *Vāmana*; with the author's own commentary (*vivaraṇa*).

It begins:

विज्ञानतो गोलमदो ऽस्ति गम्यं
तस्मात्परेषां सुगमं यतो नः ।
सद्यंत्रचिंतामणिनामधेयं
निजप्रणीतं विवृणोमि यंत्रं ॥

ग्रंथारंभे ऽभिमतदेवतानमस्कारपूर्वकं संबंधप्रयोजनयुक्तं ग्रंथनामाख्यानिकां प्रतिजानीते ॥

नत्वा कलाप्यै प्रमथादिनाथं
रविं गुरोरंघ्र्यरविंदयुग्मं ।
यंत्रं प्रवक्ष्ये गणितानपेक्ष्यम्
आशुप्रबोधं समयादिकानां ॥ १ ॥

The treatise consists of the following four chapters: 1. *yantropakaraṇasādhana*, fol. 5*b*; 2. *tripraśnādhikāra*, fol. 11*a*; 3. *grahānayanādhikāra*, fol. 12*b*; 4. *prakīrṇādhyāya*.

It ends on fol. 14*b*:

आसीदप्रजराजवंदितपदः श्रीवामनो विश्रुतो
ज्योतिःशास्त्रमहार्णवामृतकरः सत्सूक्तिरत्नाकरः ।
तत्सूनुः क्षिति[पाल]मौलिविलसद्रत्नं प्रहृष्टायणीम्
चक्रे चक्रधरः कृती सविवृतिं स यंत्रचिंतामणिं ॥

इति श्रीवामदेवसुतनंदसिंहचक्रधरविरचितं स्वविरचितयंत्रचिंतामणिविवरणं समाप्तं ॥

The last two pages contain a description, in 13 verses (विघ्नवर्कमुख्यत्रिदिवेशमूर्तेः०), by *Gaṇeśa*, son of *Keśava* of Nandigrāma, of a special variety of *yantra*, called *pratodayantra* and made of ivory or *śiṃśa* wood, to be used in battle, when mounted on horseback, as a sort of charm. [DR. JOHN TAYLOR.]

2910.

1528b. Foll. 16; size 9¾ in. by 4¾ in.; fair Devanāgarī writing of 1761 A.D.; 13–15 lines in a page.

Yantradīpikā, another commentary on *Cakradhara's* work, by *Rāma daivajña*, son of *daivajña Madhusūdana*.

It begins:

नत्वा गणाधिपं रामो मधुसूदननंदनः ।
यंत्रचिंतामणेष्टीकां कुर्वे ऽहं सोपपत्तिकां ॥ १ ॥
विलोकितानि यंत्राणि कृतानि बहुधा बुधैः ।
मतः शिरोमणिस्तेषां यंत्रचिंतामणिर्मम ॥ २ ॥
यंत्रचिंतामणिः श्रेष्ठः कथं न गणिताद्भवेत् ।
यस्माद्गणितविज्ञानक्षेत्रसमुपजायते(!) ॥ ३ ॥ ० ५ ॥
यंत्रचिंतामणेरब्धेः पारगामी स एव यः ।
सिद्धांतविचारधारो मट्टीकां नावमाश्रयेत् ॥ ६ ॥

तत्र तावज्ज्योतिःशास्त्रफलस्य लग्नमूलत्वात्० यंत्रचिंतामणिं नाम यंत्रं विवक्षुश्चक्रधरो नामाचार्यः० स्वचिकीर्षितमाख्यानिकीछंदसा व्यंजयन्नाह ।

नत्वा भवानीं प्रमथादिनाथं
रविं गुरोरंघ्र्यरविंदयुग्मं ।
यंत्रं प्रवक्ष्ये गणितानपेक्ष्यं
यथा सुबोधः समयादिकानां ॥ १ ॥

It ends:

पदव्याख्यानरूपेव टीका ग्रंथकृता कृता ।
अतो मया विदां प्रीत्यै कृतेयं सोपपत्तिका ॥

इति श्रीदैवज्ञमधुसूदनात्मजरामरुद्रदैवज्ञविरचितायां(!) यंत्रचिंतामणिटीकायां प्रकीर्णाध्यायश्चतुर्थः ॥

The title *Yantradīpikā* occurs only in the colophon of the third chapter (fol. 13*b*).

[H. T. COLEBROOKE.]

2911, 2912.

1510 d & e. Foll. 3 and 4; size 11¾ in. by 6½ in.; modern Devanāgarī writing (European paper); nine lines in a page.

Extracts from the *Sūryasiddhānta* (*jyotishopanishadadhyāya*, vv. 1–19; *bhūgolādhyāya*, vv. 38–58) and from the *Siddhāntaśiromaṇi* (*golabandhādhikāra*, vv. 1–31) on the subject of the armillary sphere. [H. T. COLEBROOKE.]

2913.

2004 a. Foll. 14; size 8¼ in. by 4 in.; fairly good Devanāgarī writing of 1752 A.D.; 10 or 11 lines in a page.

Karaṇaprakāśa, a manual for calculating the position of the sun, moon and planets, composed (? in 1092 A.D.), by *Brahmadeva Gaṇaka*, of Madhurā, son of *Candrabhaṭṭa*. [A.]

It begins:

ब्रह्माच्युतत्रिनयनार्कशशांकभौम-
सौम्येज्यशुक्रशनिवागधिपागणेशान् ।
नत्वाहमार्यभटशास्त्रसमं करोमि
श्रीब्रह्मदेवगणकः करणप्रकाशं ॥ १ ॥

शाकः शक्रदशो१०१४नितो रवि१२गुणश्चैत्रादिमासान्वितो
द्विस्थो दस्र२हतो द्विराम३२सहितो ऽधोभूपनंदै९१६र्हृतः ।
लब्धोनो विहृतः शिलीमुखरसै६५राप्ताधिमासैर्युतः
खत्रि३०घ्नः सतिथिस्त्रिधा कररसै६२र्युक्तस्ततो ऽधःकृतः [॥ २ ॥

त्रिलोचन२घ्नस्त्रिखवेदभू१४०३हृतः
फलान्वितः सागरषड्भि९४रुद्धृतः ।
फलावमानो भृगुवारपूर्वको
भवत्ययं ख्युदयादहर्गणः ॥ ३ ॥ °

The treatise consists of nine chapters (and an additional one of two genealogical verses): 1. (*graha*)*madhyādhikāra* (19 vv.; 16 in comm., vv. 13, 16, 19 not being commented upon), fol. 3*a*; 2. *tithyadhikāra* (18 vv.), fol. 4*b*; 3. *pañcatārāspashṭīkaraṇādhikāra* (13 vv.), fol. 6*a*; 4. *tripraśnādhikāra* (14 vv.), fol. 7*b*; 5. *candragrahaṇaparilekhanādhikāra* (24 vv.; 22 comm.), fol. 10*a*; 6. *sūryagrahaṇādhikāra* (11 vv.; 10 comm.), fol. 11*a*; 7. *grahodayāstādhikāra* (8 vv.), fol. 11*b*; 8. *śriṅgonnatyadhikāra* (8 vv.), fol. 12*b*; 9. *grahayutyadhikāra* (10 vv.), fol. 13*b*; 10. *granthālaṃkaraṇādhikāra*, running thus:

बाणेंदुनाड्यूनतात्क्रमज्या-
त्रिज्या१२०न्विता सैव नतोत्क्रमज्या ।
त्रिज्याधिकस्य क्रमचापयुक्ताः
खखाब्धिबाणा५४०० धनुरुत्क्रमस्य ॥ १ ॥

आसीत्पार्थिववृंदवंदितपदांभोजद्वयो माथुरः (माधुरः B.)
श्रीमच्चंद्रबुधो गुणैकवसतिर्विख्यातकीर्तिः (° तिख्यातो [द्विजेंद्रः B.) क्षितौ ।
नत्वा तस्य सुतोंघ्रिपंकजयुगं खंडेंदुचूडामणेर्
वृत्त(वृत्तं comm.; वृत्तैः B.) स्पष्टमिदं चकार करणं [श्रीब्रह्मदेवः कृती ॥ २ ॥

इति श्रीमज्ज्योतिर्विच्चंद्रभट्टसुतसमस्तगणकवंद्यब्रह्मदेवविरचिते करणप्रकाशे ग्रंथालंकरणाधिकारो दशमः ॥ श्रीशके १६७४ ° ॥

[DR. JOHN TAYLOR.]

2914.

2004 b. Foll. 65; size 8¼ in. by 4 in.; the same writing of 1755 A.D.; 10–12 lines in a page.

Karaṇaprakāśavyākhyāna, with the special title of *Prabhā*, by *Śrīnivāsa*. The text of the original treatise is given in full. [B.]

It begins:

श्रीमद्दंतिमुखं नत्वा ब्रह्मविष्णुशिवैर्नुतं ।
सर्वाभीष्टप्रदं वंदे द्वादशस्य पुरे स्थितं ॥ १ ॥
जाग्रती रसनाग्रेम (? मे) गिरामप्यधिदेवता ।
सरस्वती भयत्येषा चतुर्वदनगामिनी ॥ २ ॥

नत्वा दंतिमुखं सुशब्दरचनाबुद्धिप्रदां भारतीं
वेधोविष्णुशिवान् गुरूनहमिमान्सूर्यादिकान्खेचरान् ।
ज्योतिःशास्त्रसुधाभिलंघनपटुप्रीतिप्रदं चक्रुषो
व्याख्यासे(*r.* ०स्ये) करणप्रकाशमधुना श्रीश्रीनिवासः
[सुधीः ॥ ३ ॥

प्रारिप्सितस्य ग्रंथस्य० प्रतिजानीते । ब्रह्माच्युतेति । ० ॥ १ ॥ शाकः ० । शाकः शकवर्षसमुदायः । शक्रदशोनितः । चतुर्दशाधिकसहस्रो१०१४नितः । शेषांकः । गताब्दसंघः । सः । रविगुणः । द्वादशभि१२र्गुणितः । चैत्रादिमासान्वितः । चैत्रादिगतमासैर्युतः । द्विस्थः । द्विस्थाने स्थापितः । दसहतः । एको द्वि२गुणितः । द्विरामसहितः । द्वात्रिंशता ३२ युतः । अधः । तस्याधोभागे तद्वत्स्थापनीय इत्यर्थः । भूपनंदैर्हृतः । षोडशाधिकनवशतै९१६-र्हृतः । लब्धोनः । तदुपरिस्थः । तत्फलेन हीनः । शिलीमुखरसैः । पंचषष्ट्या ६५ भाजितः । साप्ताधिमासान्वितः । लब्धैः सैकैमेकैरधिमासैर्युतः । खत्रिघ्नः । त्रिंशता ३० गुणितः । सतिथिः । तन्मासगततिथिभिः सहितः । द्विधा । द्विस्थाने स्थापितः । कररसैर्युक्तः । द्विषष्ट्या६२ युतः । ततोधःकृतः । तस्मादधोभागे तद्वत् स्थापनीयः । विलोचनघ्नः । द्वि२गुणितः । त्रिखवेदभूहृतः । त्र्यधिकचतुःशताधिकसहस्र१८०३भक्तः । फलान्वितः । तदुपरिस्थः । तत्फलेन युक्तः । सागरपङ्क्तिरुद्धृतः । चतुःषष्ट्या ६४ भक्तः । फलावसानोनः । तत्फल एव क्षयदिनै रहितः । भृगुवारपूर्वकः । शुक्रवारादि भवत्ययं रव्युदयादहर्गणः । सूर्योदयात् । अहर्गणः । अह्नां गणो भवति ॥ ३ ॥

It ends:

इत्याचार्यश्रीमन्महाभाष्यभट्टारकश्रीमद्विष्णामिश्रान्ववायकारीशपरिपूर्णसुधाकरश्रीमच्छ्रीनिवासभट्टविरचिते करणप्रकाशव्याख्याने प्रभासंज्ञे ग्रहाणां युद्धाधिकारो(!) नाम नवमो ऽध्यायः ॥ इत्यष्टाधिकारः(!) ॥

बिंदुदुर्लिपिविसर्गवोधिकाः शृंगपंडितपदभेददूषिकाः ।
हस्तवेगजडबुद्धिपूर्वकं क्षंतुमर्हंतु समीक्ष्य सज्जनाः ॥ १ ॥

स्वस्ति श्रीजयाभ्युदयनृपशालिवाहनशक१६७९नेय ईश्वरसंवत्सरे मार्गशिरवदि ७ रविवारे समाप्तं ॥ हावनूरसदरजोइसनारायणदैवज्ञसुतयज्ञदैवज्ञतत्पुत्रकालिंगेन लिखितं स्वार्थं परार्थंच ॥

Whilst the first of the two final stanzas of the text is not referred to at all in the commentary, the second is included in the last chapter as verse 11 [माथुरः = मथुरा निवासो ऽस्य ॥ करणं = ज्योतिःशास्त्रसिद्धांतप्रकरणं । वृत्तं ज्ञातावेकवचनं स्पष्टं चकार ॥] [Dr. John Taylor.]

2915.

2004c. Foll. 13; size 8¼ in. by 4 in.; the same writing; eleven lines in a page.

[*Karaṇaprakāśavṛitti.*] A fragment of another commentary on the same treatise; by *Dāmodara*, pupil of *Padmanābha*.

It begins:

यशोभिरुद्भासितमासमुद्रं
विश्वंभराया वलयं च यस्य ।
सकारणादंशुमतो ऽवतारः
श्रीपद्मनाभो जयतीह धीमान् ॥ १ ॥

अहो मनुष्यस्य न तावदेवं-
विधं यशः स्यादविचार्यमार्यैः ।
प्रकाशकारी न रविं विनान्यो
यतस्त्रयी मूर्तिरिति प्रसिद्धं ॥ २ ॥

ग्रंथार्थविच्छिन्निभयादिहार्को
ऽवतीर्य भूमावखिलां(०लं) चकार ।
शास्त्रं खिलीभूतमिहावगम्य
श्रीब्रह्मगुप्त त्वमपा(०प) क्रमेण ॥ ३ ॥

श्रीभास्कर त्वं च ततश्च साक्षात्-
श्रीपद्मनाभ त्वमनाथबंधुं ।
दयानिधिं सर्वगुरुवरेण्यं
श्रीपद्मनाभं तमहं नमामि ॥ ४ ॥

तदंह्रिसेवाभिरवाप्तविद्यो
दामोदरो दैवविदां वरिष्ठः ।
सहोपपत्त्या करणप्रकाशं
वृणोति दैवज्ञमनःप्रतुष्ट्यै ॥ ५ ॥

अथ ग्रंथारंभे०

The MS. breaks off abruptly (at the bottom of fol. 13*a*) in the comment on the 11th verse of the first chapter.

[Dr. John Taylor.]

2916.

234a. Foll. 7; size 12¼ in. by 4½ in.; clear, modern Bengali handwriting; seven lines in a page.

Bhāsvatī, or *Bhāsvatīkaraṇa*, another manual of rules for determining the position of the

heavenly bodies (in accordance with the system of the *Sūryasiddhānta*), composed, in 1099 A.D., by *Śatānanda*, a resident of Purushottama, son of *Śaṅkara* and *Sarasvatī*.

It begins:

अथ प्रवक्ष्ये मिहिरोपदेशात्
तत्सूर्यसिद्धान्तसमं समासात् ।
चन्द्राश्विशून्येन्दुविहीनशाकः १०२१
शास्त्राब्दपिण्डो भवतीह शास्त्रे ॥ १ ॥
शास्त्राब्दपिण्डः स्वरशून्यदिग्घ्न१००७स्
तानाग्नियुक्तो ३४९ ऽष्टशतै८००र्विभक्तः ।
लब्धं नगैः ७ शेषितमङ्कयुक्तं
सूर्यादिसंवत्सरपालकः स्यात् ॥ २ ॥
शेषं हरेः ८०० प्रोह्य पृथग्गजाशाः १०८
लब्धं रवेरौदयिको ध्रुवः स्यात् ।
सहस्रनिघ्नः १००० खविधूनितो ऽथः
खसिद्धभागोन२४०भचक्र२७००शेषः ॥ ३ ॥
खपञ्च५०संयुक्त° ॥
पृथक् खखागाप्त° ॥

Cf. Aufrecht, Cat. Trin. Coll. Camb., pp. 48–50; Colebrooke, Misc. Ess., ii., 389-90.

There seem to be two recensions of this little work, the one, as contained in the present MS. (? the Bengalī rec.) being somewhat shorter than the other (? Dev. rec.)

This MS. ends:

खखाश्विवेदाधिगते युगाब्दे
दिव्योक्षितः श्रीपुरुषोत्तमस्थः ।
श्रीमान् शतानन्द इतीदमाह
सरस्वतीशङ्करयोस्तनूजः ॥
इति भास्वती समाप्ता ॥
नेत्राग्निभूपाधिगते शकाब्दे
प्रणम्य नारायणमादिदेवं ।
श्रीकाशिरामाख्यधरासुपर्वे
लिलेख पुस्तीं दयितां बुधानां ॥

This date (Śaka 1632 = A.D. 1710) must have been that of a former MS.

[H. T. COLEBROOKE.]

2917.

1051c. Foll. 8; size 16¼ in. by 3¾ in. (folded to half the length); careless, modern Bengalī handwriting; six lines in a page.

The same work, in the same recension.

Between the first two verses of the preceding MS., this copy, however, inserts the following verse (cf. Camb. MS.):

नत्वा मुरारेश्चरणारविन्दं
श्रीमान् शतानन्द इति प्रसिद्धः ।
तां भास्वतीं शिष्यहितार्थमाह
शाके विहीने शशिपक्षखैकैः १०२१ ॥

It ends: खखाश्विवेदविगते युगाब्दे° स्तनूजः ॥ इति पञ्चसिद्धान्त्यां श्रीभास्वत्यां परिलेखाधिकारो नामाष्टमो ऽध्यायः ॥

[H. T. COLEBROOKE.]

2918.

234b. Foll. 43; size 12¼ in. by 4½ in.; clear, modern Bengalī handwriting; eight lines in a page.

Bhāsvatīratnadīpikā, also called *Bhāsvatīratnamālā*, or *Bhāsvatikārtharatnamālikā*, a commentary on the *Bhāsvatī*; by *Acyuta Bhaṭṭa*, also called *Mihirācārya* and *Mihirācāryācyuta Bhaṭṭa*, son of *Sāgara Bhaṭṭa*.

It begins:

मदिष्टदेवाय महानुभाविने
विरिञ्चिनारायणशङ्करात्मने ।
समस्तवेदार्थमयाय तेजसे
भृशं नमस्ते ऽखिलविश्वमूर्तिने ॥
वेदान्तागमकाव्यशास्त्रनिगमव्याख्यानदीक्षागुरु-
ज्योतिःशास्त्रविकाशनैकमिहिरो ऽभूत्सागराख्यो द्विजः ।
शिष्यप्रार्थनया तदीयतनयः संवीक्ष्य होरार्थकं
तेने भास्वतिकार्थरत्नरचितां मालां हि भट्टाच्युतः ॥

प्रारिप्सितग्रन्थसमाप्तिमभिलक्षमाणः कविर्मङ्गलमाचरति ॥ अथेत्यादि ॥ प्रारब्धग्रन्थस्य परिसमाप्त्यर्थं अथशब्दो ऽत्र मङ्गलप्रतिपादकः । अथशब्दो ऽथानन्तर्ये वा । श्रीसूर्यसिद्धान्तादिवराहमिहिरादिकृतगणितशास्त्रसममिदं शास्त्रं समासात् संक्षेपात् प्रवक्ष्ये इदं शास्त्रमित्यध्याहारः॥ चन्द्राश्वीति। शकनृपतेरयं

वत्सरः शाकः शाको ऽयं चन्द्राग्निशून्येन्दुविहीनः सन् शास्त्राब्दपिण्डो भवति। तदुच्यते। तथा चायं शास्त्राब्दपिण्डः चन्द्राग्निशून्येन्दुयुतः सन् शाको भवति। तथा च शास्त्राब्दो रूपनेत्राशा-१०२१युतः शाको निगद्यते। शाकं च रूपनेत्राशा१०२१हीनं शास्त्राब्द उच्यते॥ * ॥ संवत्सरपरिज्ञानार्थमाह। शास्त्राब्दपिण्ड इति। स एव शास्त्राब्दपिण्डः खरशून्यदिग्घ्नः सप्ताधिकसहस्रेण गुणनीयः। खराः सप्त एव खरशून्यादिकपूरिताङ्कः। तानाग्नियुक्तः ऊनपञ्चाशदधिकशतत्रयं तत्राङ्के योज्यं ताना(? ताला) एकोनपञ्चाशद्भिरग्निः त्रयं। तथा च स्वराः सप्त त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः। ताना एकोनपञ्चाशदर्को द्वादशवाचकः। स चाष्टशतैर्विभक्तः तमङ्कं अष्टशतेन हरेदित्यर्थः॥ एतदुक्तं भवति। अष्टशतेन हृते यल्लब्धं तन्नगैः शेषितं कृत्वा पुनरङ्कं दत्त्वा पुनरपि नगैः सप्तभिः शेषिते स एव शेषः स एव सूर्यादिसंवत्सरपालकः स्यात्। सौरसंवत्सरस्यादौ प्रथमदिने पालकनामा स्यात् तस्मिन्नब्दे ग्रहे यत्र यत्र शेष एव (oblit.) ग्राह्यः तत्र लब्धशब्द इत्युच्यते तत्र शेष एव ग्राह्यः तत्र लब्धं प्रोज्झयेत् लब्धस्य प्रयोजनाभावात्॥ * ॥ रवेर्भुवार्थमाह शेषमिति। ° ॥ न तु लब्धं स्यापयेदिति ततः किं कर्तव्यमित्याह खपञ्चेति।

The colophons of the first seven chapters occur on foll. 5*a*, 11*b*, 17*b*, 25*a*, 29*b*, 34*b*, 38*b*. The eighth chapter ends without colophon on fol. 40*b*, l. 2, after which an appendix on *meghajñāna*, "not explained in its proper place in the first *khaṇḍa* (cf. 76, 1 inf.), is adduced from another book by *Acyuta Śarman.*"

That *Śatānanda's* calculations are based on the meridian of *Purushottamakshetra* (in Utkala) is explained by *Acyuta* (fol. 4*a*) as well as by other commentators.

As to the date of composition, the choice is left between the two Śaka years 1427 and 1456, for both of which observations are recorded on foll. 41*a*, l. 1 and 7*a*, l. 2 inf.

It ends:

न शत्रवे दर्पयुताय नैव (च)
न मत्सरायाशुचये न चैव।
नाशिष्यभावोपगताय दद्याद्
व्याख्यामिमां सर्वगुणोपपन्नां॥

श्रीमत्प्रभुप्रवरराघवपादयुग्म-
पद्मोपजीवनपरोत्सुकभृङ्गरूपी।
श्रीभास्वतीगणनशास्त्रसुबोधटीकाम्
अभ्याकरोत्कविवरो ऽच्युतभट्टसिंहः॥

इति श्रीसाशरभट्टात्मज(!)मिहिराचार्याच्युतभट्टविरचितायां भास्वतिकार्थरत्नमालिकायां चन्द्रादिमानाङ्गुलादिनिर्णयविवरणं संपूर्णमिति॥ समाप्तेयं भास्वतिकार्थरत्नमालिका॥

The name of the author's father is not given in the other colophons, which run thus: इति श्रीमिहिराचार्याच्युतभट्टविरचितायां °.

[H. T. Colebrooke.]

2919.

1286. Foll. 106; size 13 in. by 7¼ in.; good Devanāgarī writing of 1811 A.D.; 10 or 11 lines in a page.

Bhāsvatīkaraṇa (in the larger version), with four commentaries in the following order:

I. (foll. 1–34) *Bhāsvatīvyākhyā* by *Kuveramiśra,* composed, it would seem, in A.D. 1685.

It begins:

सिद्धिबुद्धियुतं नत्वा गणेशं च गुरुन्गिरं।
कुर्वे ऽहं भास्वतीव्याख्यां ग्रन्थानालोच्य तत्त्वतः॥ १॥
यद्यप्यार्यैः कृता टीका तथाप्यारभ्यते मया।
Viśvanātha's commentary (*ṭīkā*) on *Nīlakaṇṭha's Varshatantra*, omitting the text of the latter after the first two verses.

It begins:

यत्पादपद्मं सुरसिद्धदैत्या
अभीष्टसिद्धौ प्रणमंति नित्यं ।
तं विघ्नराजं मनसा स्मरामि
भक्तप्रियं नागमुखं गणेशं ॥ १ ॥

Again *Viśvanātha* mentions his father and his brothers, as well as his native place, although in different terms from those used in the first part. Cf. Rāj. Mitra, Notices, viii., p. 201.

Of both parts there are several Indian editions, with this commentary; whilst the supplementary part of *Nīlakaṇṭha's Tājika*, the *praśnaprakaraṇa*, does not seem to have been commented upon by *Viśvanātha*.

[Gaikawar.]

3053.

590 b. Foll. 94 (numbered 19 + 28 + 3 + 22 + 22); size 11¼ in. by 4 in.; fair Devanāgarī writing of 1751 A.D.; 9–11 lines in a page.

Śiśubodhinī, or *Śiśubodhavatī*, another commentary on *Nīlakaṇṭha's Tājika*, by *Mādhava jyotirvid*, son of *Govinda jyotirvid*, and grandson of the author of the original treatise.

The MS. is incomplete, the latter portion of the first and the earlier portion of the second part being wanting.

I. *Saṃjñātantra*, sections 1–3, begins:

हेरंबं भुवनस्यशीर्षमधुलिट्संसक्तपादांबुजं
गौरीहृत्कमलप्रकाशतरणिं विघ्नाटवीपावकं ।
जृंभद्वैरिकुलांतकं सुमनसां श्रीसिद्धिबुद्धिप्रदं
सिंदूरारुणगंडयुग्ममनिशं भालौषधीशं भजे ॥ १ ॥
प्रभाकरं सर्वजगत्प्रभाकरं
त्रयीतनुं ब्रह्महरीश्वरात्मकं ।
लोकस्य सृष्टिस्थितिनाशकारकं
वंदे ग्रहाधीशमभीष्टसिद्धये ॥ २ ॥
श्रीचिंतामणिदैवविन्नुभवो ऽनंतो द्विजन्माग्रणीर्
भूमीमंडलशोभिभूपतिकुलैः संमानितः सादरं ।
सर्पाधीशगवीविचारचतुरो गर्गो मुनिर्ज्योतिषे
देशादेत्य विदर्भतो बुधवरो वाराणसीमावसत् ॥ ३ ॥
तत्सूनुर्गणितार्णवैकतरणिः श्रीनीलकंठो बुधो
ऽभूद्वेदस्मृतितर्कशास्त्रनिपुणो भूमीपमालार्चितः ।
ज्योतिःशास्त्रमिदं त्रिधा समकरोत्प्रोड(? प्रौढ)रानंददं
श्रीशेषाहिसरस्वतीं सविकृतिं शिष्यान् सदाध्यापयत्
[॥ ४ ॥
गोविंद श्करदपादसरोजभृंगस्
तस्मादभूद्भुजगराजगवीप्रवीणः ।
ज्योतिर्नयप्रचुरप्यण(? पारण)कृच्छ्रुतिज्ञः
श्रीगार्ग्यवंशतिलको गणकाधनेशः ॥ ५ ॥

तस्मादभूवन्विबुधेज्यकल्पास्
त्रयः सुता ज्योतिषशास्त्रनिपुणाः ।
ज्येष्ठो ऽनंतो ऽनुजमाधवाख्यश्
चिंतामणिस्तत्परतो विपश्चित् ॥ ६ ॥

तेषु श्रीगणनाथभक्तिविलसद्विद्यागणो माधवः
शिष्यप्रार्थनयोररीकृतवचाः संक्षिप्तटीकाकृतौ ।
श्रीगोविंदगुरोः प्रणम्य चरणांभोजं प्रकुर्वे ततो
लब्ध्वा बोधलवं पितामहकृते सत्ताजिके व्याकृतिं ॥ ७॥

जीर्णास्ति टीका महतीति मूलं
तस्थं विचारं मुनिसंमतिं च ।
कृत्वाहमल्पां शिशुबोधिनीं तां
संज्ञाविवेकस्य करोमि टीकां ॥ ८ ॥

तत्र तावत्सकलमुनिश्रेष्ठगार्ग्यवंशतिलको निखिलविद्वद्दैवज्ञ-मुकुटहीरो ऽनंतज्योतिर्विदनुजः श्रीनीलकंठज्योतिर्वित् संज्ञातंत्र-वर्षप्रश्नतंत्ररूपप्रकरणत्रयात्मकस्य जीर्णताजिकशास्त्रस्य प्रथमं प्रकरणं संज्ञाविवेकनामकं °चिकीर्षुः °प्रतिजानीते। प्रणम्येति°॥ श्रीनीलकंठः° समरसिंहादिनिर्मितं ताजिकं ताजिकनामकं शास्त्रं विविनक्ति°। भेदप्रतिपादनं च पितृचरणकृतायां बृहट्टीकायां रसालाभिधायां (thus also foll. 4*b*, 23*b*, 29*b*, etc., not सरला°) द्रष्टव्यं ° ।

The first two sections of Part I.—*graha-prakaraṇa* and *shoḍaśayogāḥ*—conclude (*mutatis mutandis*):

विद्वद्विधिज्ञगणसेवितपादपद्म-
गोविंदसंज्ञसुतमाधवनिर्मितायां ।
संज्ञाविवेकविवृतौ शिशुबोधवत्याम्
आगात्समाप्तिमिह (षोडशयोगसंघः) ॥

इति श्रीविद्वद्दैवज्ञमुकुटभूषणश्रीगोविंदज्योतिर्वित्सूनुमाधवज्योतिर्विद्विरचितायां संज्ञाविवेकविवृतौ शिशुबोधिन्यां (ग्रहस्वरूपदृष्टिगणितषोडशयोग)प्रकरणं समाप्तम् ॥

The third section (on *sahamāni*) is incomplete.

II. *Varshatantra*, only the last two chapters: *a*) *bhāvaphalāni*, begins:

गणनायकं हृदयवांछितदं
प्रणिपत्य तातपदपद्मनपि ।
बुधमाधवः प्रकुरुते विवृतिं
प्रमिताक्षरां शरविभावतते ॥ १ ॥

अथ द्वादशभावफलाध्यायं वक्तुकामः °

b) *māsadinapraveśaphala*, begins:

गणेशांघ्रियुग्मं नमस्कृत्य° माधवो ऽहम् ।
समाविवेके दशाध्यायमासप्रवेशादिटीकां करोमीष्टतुष्ट्यै ॥ १ ॥

These two sections end (*mut. mut.*)·

विद्वद्विधिज्ञ° माधवनिर्मितायां ।
श्रीवर्षतंत्रविवृतौ शिशुबोधवत्याम्
एयाय मासदिनवेशफलं प्रपूर्तिम् ॥

इति° समाविवेकटीकायां शिशुबोधिन्यां मासप्रवेशदिनप्रवेशफलप्रकरणं समाप्तिमागात् ॥

[H. T. COLEBROOKE.]

3054.

2308. Foll. 81; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 23 lines in a page.

The same work; copied from the preceding MS. [CALCUTTA.]

3055.

1122 b. Foll. 19; size 11¾ in. by 4 in.; fair Devanāgarī writing of 1799 A.D.; ten lines in a page.

Nīlakaṇṭha's Praśnaprakarana, or *Praśnakaumudī*, a code of rules for the guidance of sooth-sayers and fortune-tellers when professionally consulted by people regarding the events of every-day life; forming a supplementary part to the author's *Tājika*.

It begins: अथ प्रश्नप्रकरणं निरूप्यते ॥ अथ प्रश्नविचारमाह वराहः । दैवज्ञस्य हि देवेन °

The treatise is included in the Benares edition (1865) under the title of *Praśnatantra*, notwithstanding the fact that a *Praśnatantra* (*Tājakoktapraśnatantra*) is quoted in it, *e.g.* fol. 3*b*, l. 9; fol. 4*a*, l. 8; fol. 13*a*, l. 5.

Of other authorities, besides *Varāha* and *Utpala*, may be mentioned: *Caṇḍeśvarapraśnavidyā*, fol. 2*a*, l. 4; *Cintāmaṇi*, fol. 2*a*, l. 7;

Jñānamuktāvalī, fol. 2*a*, l. 6; *Tājika-Samarasimha*, fol 8*b*, l. 6; *Trailokyaprakāśa*, fol. 11*a*, l 3; *Prithuyaśas* (? his *Praśnakoshthī*, see above no. 2993), fol. 16*a*, l. 4; *Praśnacintāmani*, fol. 11*b*, l. 3; *Praśnadīpaka*, fol. 4*a*, l 5; 10*a*, l 2; *Praśnapradīpa*, fol. 12*b*, l. 8; *Bhuvanadīpaka*, fol. 3*a*, l. 2; 12*b*, l. 15; 14*b*, l. 6.

A fragment of this work is described in Weber's Berl. Cat., no. 883, which breaks off at fol. 8*b*, l. 6 of the present MS.

In the colophon (except date and scribe's name) every second syllable is left blank, no doubt to have been filled up in red ink, after the fashion of some calligraphers. With the blanks filled up, it would read as follows: इति श्रीनीलकंठविरचिततताजिककौमुद्यां प्रश्नप्रकरणं समाप्तं प्रश्नकौमुदी ॥ संवत् १८५६ मुलषदं लिखितं व्रोद्मण(!) ॥

[H. T. COLEBROOKE.]

3056.

2305. Foll. 17 (numbered 18, no. 15 having been passed over); size 4to, 13 in. by 10 in.; fair Devanāgarī writing of 1799 A.D.; 26 lines in a page.

The same work; copied from the preceding MS., or from the same original.

[CALCUTTA.]

3057.

2041b. Foll. 35 (fol. 29 and fol. 30*a* of which are left blank); size 11 in. by 5¼ in.; good Devanāgarī writing of 1800 A.D.; 9 or 10 lines in a page.

Tājikālaṃkāra, a treatise on astrology, composed, in 1730 A.D., by *Śambhurāma*, an adherent of the Saura creed, the son of *Gokula*, a native of Gujarat and resident of Dhavalapura, on the banks of the Suranadī, near the shrines of *Harapīṭha* and *Caṇḍīnātha*.

It begins:

श्रीसूर्यं त्रिगुणं सवंशगणपं सांगं हरिं विश्वसृम्
संबां चादिभवं शिवं ग्रहगणैः पंचायतानां गुरुं ।
प्रणम्यार्भकबोधनाय सुगमं कुर्वे ह्यहं ताजिका-
लंकारं ननु शंभुराम अखिलं लोकाय श्रेयस्करं ॥ १ ॥

धात्रा चादियुगे कृतं दृढतरं व्यासे[न] तत्रानुगे
गर्गेणागममथ्यमानविमलं शास्त्रं कृतद्वापरे ।
लोकायापि कलौ युगे सपदि यद्धर्थ्यं त्वभर्थ्यं फलं
शास्त्रं यावनयुक्तिमत्कृतमिदं सत्यं सदा दृश्यते ॥ २ ॥

The work is divided into 12 chapters, viz · I. (fol. 5*b*) *varsheśanirūpaṇa*; II. (fol. 15*a*) *grahabhāvaprayojana*; III. (fol. 17*b*) *munthāprayojana*; IV. (fol. 18*b*) *rājayoga*; V. (fol. 20*b*) *shoḍaśayogāḥ*; VI. (fol. 22*b*) *miśrabhāva*; VII. (fol. 23*a*) *grahayoga*; VIII. (fol. 26*a*) *yogisvapna*; IX (1b) *sahamāni*; X. (fol. 31*a*) *māsapraveśa*; XI. (fol. 33*a*) *dinapraveśa*; XII. *dinacaryāgranthanirūpana*.

It ends:

श्रीसूर्यसेवानुगतस्तु गोकुलम्
तस्यांगजो ऽसौ त्रिगुणात्मसेवकः ।
श्रीशंभुरामो ह्यकरोत्तु ताजिका-
लंकारमौदीच्यकुलोद्भवो द्विजः ॥ १४ ॥

दीनो ऽथवा नीचकुलोद्भवोंगके(!)
मूर्खो ऽपि यो ऽलंकरणं विधार्यते(? विधारयेत्) ।
शशेन तुल्यो ऽपि गजेषु केसरी
तथैव भूम्यां स नरो विराजते ॥ १५ ॥ ० १६ ॥

नागाहिशैलेंदुमिते तु विक्रमात्
करेषुभूपे १६५२ शकगे तपस्यके ।
मासे सिते पक्षगते विधूदये
तिथौ भृगौ पूर्णमभूदयं श्रमात् ॥ १७ ॥

धरणितलवरिष्ठे गुर्जराख्ये हि देशे
सुरनदीहरपीठे(!) चंडिनाथे समीपे ।
धवलपुरनिवासी शंभुरामो ऽर्कसेवी
विविधमत(? ० मत)युताल्रंकारकं चाकरोद्वै ॥ १८ ॥

इति श्रीमद्दैवज्ञगोकुलात्मजशंभुरामकृतौ ताजिकालंकारे दिनचर्याग्रंथनिरूपणं नाम द्वादशः प्रकाशः ॥ १२ ॥

नवनवमुनिचंद्रे विक्रमाद्वर्षकाले
निगमरसनृपाख्ये शालिवाहात्प्रयाते ।
इषसितस्मरतिथौमीज्यवारेंवुपेभे(!)
धवलपुरनिवासी शंभुरामो ऽलिखद्वै ॥ १ ॥ ०

The MS. would thus seem to have been copied from one written by the author himself in 1742.

For the sake of the references contained therein we extract the following verses

इतीरितं गोकुलसूनुशंभुना
मिश्रं फलं वा ग्रहयोगजं फलं ।
हिल्लाजमत्यानुगतं(!) तु हायन
मासे ऽथवा सद्भिरिदं विचिंतयेत् ॥ fol 23*a*,

इतीरितं भूपजनाय हेतवे
सिंहावलीतो हिल्लाजताजिके ।
नरस्य कंठानुगतः स ताजिका-
लंकारको देववंदा(दैवविदां) विराजते ॥ 34*b*

[GAIKAWAR]

3058.

2541b. Foll. 20, size 10 in by 4½ in, good Devanāgarī writing of about 1650 A.D, fifteen lines in a page.

Tājikasāra, a treatise on astrology, especially horoscopy, by *Haribhaṭṭa*.

It begins:

श्रीरामस्य पदारविंदयुगलं नत्वाथ वागीश्वरीं
हेरंबं तपनादिकं ग्रहगणं रुद्रं यशोदासुतं ।
वक्ष्ये ताजिकसारमल्पसुगमं रम्यं सुबोधप्रदं
नानाताजिकतो विलोक्य रचितं दैवज्ञहर्षप्रदं ॥ १ ॥

यत्पूर्वार्जितमात्मदेहजनितं दैवं शुभं वाशुभं
तत्सर्वं हि विपाकमेति नियतं वर्षादिके निश्चितं ।
सर्वैः संमतमत्र जन्मनि परं जंतोः स्फुटं सूरिभिस्
तस्मात्तत्परिचिंत्य वर्षजनितं वक्ष्ये फलं स्फूर्तिमत् ॥ २ ॥

यातो वर्षगणो हि जन्मसमयात्स्याप्यश्चतुर्धा क्रमात्
पंचांगाग्निभि ३६५ रिंद्रियेंदुभि १५ रिलारामैः ३१ खरामै-
[३० र्हतः ।
जन्माहर्गणनाडिकापलयुतः स्यादिष्टवर्षादिके
यातो ऽह्नां निचयः स यो [ऽ]जनि दिने यद्भं यतः
[साधितः ॥ ३ ॥ ० १५ ॥

सूर्याप्तागतवत्सराश्च सहितास्तत्कर्णशाके ११०५ ततो
मासाशेषमिता हि वर्षसमयो ह्येवं निरुक्तो बुधैः ।
कर्तव्याः खचरास्ततः स्फुटतराःभावाद्युवृंदात्ततो
दृक्पक्षाहिविचारिणामिह ततो विर्याणि(!) संधारयेत्
[॥ १६ ॥

It ends

आलोक्य नानामुनिनां(!) मतानि
सम्यक्कृतं ताजिकसारमेव ।
स्वल्पं विचित्रं हरिणा सुखार्थं
ज्योतिर्विदां तद्विविधैः सुपद्यैः ॥ १७ ॥

इति श्रीहरिभट्टविरचिते ताजिकसारे दिनप्रवेशप्रकरणं संपूर्णं ॥

Cf. Rāj. Mitra, Notices, VIII, p. 238.

[GAIKAWAR]

3059.

2541c. Foll 20; size 10 in. by 4½ in; fair, small Devanāgarī writing of 1673 A D., 21 lines in a page.

Tājikasāraṭīkā Kārikā, a commentary on the preceding work, composed, in A D. 1620, by *Sumatiharsha* (surnamed *Sāmanta*?), under *Vishnudāsa* (? of Khairābād)

It begins

श्रीसूर्यचंद्रारबुधेंद्रपूज्यान्
भृग्वार्किमुख्यान् प्रणिपत्य खेटान् ।
हृन्मानसस्वर्णसुबोधपद्म-
प्रबोधने तिग्मकरं गुरुं स्वं ॥ १ ॥

श्रीशारदीयं शरदिंदुशुभं
तेजोऽसताध्वांत इवैकदीपं ।
निधाय चित्ते विवृणोमि ताजि-
कसारतंत्राशुकरान्पदार्थान् ॥ २ ॥

वि[लि]ख्यादौ वृहत्पर्वमालावृत्तिमथोद्यतः ।
कर्तुं च कारिकामेतां शिष्यबोधकृते कृती ॥ ३ ॥

इह शिष्टा इष्टे वस्तुनि प्रवर्तमाना० मंगलाचरणमभिधेयं चाह । श्रीरामस्य ०

It ends:

वर्षे शैलहयांगभूपरिमिते १६७७ मासे तथा फाल्गुने
पक्षे शुक्लतरे तिथौ दशमिते श्रीपेरवापूर्वरे(!) ।
राज्ये श्रीमति विष्णुदासनृपतेर्वैरीभ(? *r.* खरीभ = [*sherīf*)वृंदे हरे[र्]
वृत्तिं श्रीगुरुहर्षरत्नकृपया सामंतनामाकरोत ॥ २ ॥

गुरुबोधवरलाद्भदीपीयुधेनराजयोः ।
निरंतराग्रहादेषा रचिता तनुताचिरं ॥ ३ ॥

इत्यांचलिकमहोपाध्याय - श्री५श्रीउदयराजगणिकुंजराणां शिष्योपाध्यायश्रीहर्षरत्नगणिशार्दूलानां शिष्यपंडितवादिराजश्रीसुमतिहर्षगणिकृता ताजिकसारटीका कारिका नाम्नी ॥

For other copies of this work see Rāj Mitra, Notices, iii., p. 348; viii., p. 239.

[GAIKAWAR.]

3060.

2372a. Foll. 7; size 10¾ in. by 5 in.; fair Devanāgarī writing of 1649 A.D.; eight lines in a page.

Tājikapaddhati, a short treatise on astrology, by *Keśava Daivajña*.

It begins:

यतस्ताजकोक्तं फलं हायनोत्थं
क्रमाद्योक्तमन्यैर्यतो दुर्गमं तत् ।
क्रमाद्ब्रुवे तत्पद्धतिं प्रस्फुटोक्त्या
गणेशं नमस्कृत्य बालावबोधां ॥ १ ॥

It ends:

इति वर्षफलस्य पद्धतौ स्मृतेशाद्दियुगप्रसादतः ।
बहुशिष्यजनप्रबोधिनीमकरोद्विप्रवरिष्ठकेशवः ॥ ३४ ॥

इति श्रीकेशवदैवज्ञविरचितायां ताजिकपद्धतिः संपूर्णा ॥ स्वस्ति श्रीराजदुर्गे वास्तव्यगिरिनारायणज्ञातीयजोशीश्री५-नारायणसुतमुकुंदजीकेन लिखितं ॥ ० संवत् १७०६ वर्षे चैत्र-वदि ७ शुक्रे लि० ॥

See Berl. Cat., no. 872; also published, with *Viśvanātha's* commentary, at Benares, in 1869.

[GAIKAWAR.]

3061.

2529c. Foll. 6; size 9¾ in. by 5¼ in.; good Devanāgarī writing of about 1700 A.D., ten lines in a page.

[*Tājikamatānusāra-*]*Maṇitthagrantha*, a treatise on divination in 70 *upendravajra* stanzas, apparently supposed to be derived from, or to embody the views of, *Maṇittha* (*Manetho*). Rather incorrect.

It begins:

पूर्वं प्रणम्येश्वरपादपद्मं
ततो भवानीं गणनायकं च ।
करोमि सम्यक्फलमत्र हायनं
भवेति तज्ज्ञा विदितेन येन ॥ १ ॥

गताब्दवृंदा मुनिखाभ्रचंद्रै१००१२(?)
निघ्नाखभोव्योमगजैश्च८०० भक्तात् (?भक्ताः) ।
त्रिधा फलं वारघटीफलानि
स्युर्जन्मवारादियुतानि तानि ॥ २ ॥

द्विस्था गताब्दा गुणयेच्च रुद्रै११र्
अधः खसप्तक्षिति१७०लब्धयुक्ताः ।
युक्तास्तथा जन्मगतैर्दिनैश्च
खराम३०भक्तास्तिथिरत्र शेषा ॥ ३ ॥

ततश्च लग्नं गतराशियुक्ताः
स्पष्टाश्च कार्याः सकलाश्च खेटाः ।
द्विचंद्रभक्तैश्च गताब्दपिंडैः
शेषैर्थिहा स्यादयजन्मलग्नात् ॥ ४ ॥

क्रमेण युक्ता मुथहा पुराणैः
शुभाशुभस्यापि निरूपणाय ।
दिवा विलग्ने रविनायको ऽपि
रात्रौ शशी लग्नपजन्मपश्च ॥ ५ ॥ ० ७ ॥

ततः प्रवक्ष्ये यवनानुसारं
बलाबलं यद्ब्रहसंभवं च ।
त्रिकोणसंस्थे फलमत्र पादं
हीनं दलं खे भवनेऽधिमात्रे ॥ ८ ॥ ० १६ ॥

वृथाफलं हायनमत्र यस्मान्
न जीवितं हायनमत्र योगात् ।
रिष्टानि योगात् प्रवदं(?) प्रवक्ष्ये
मणित्थपूर्वैः[:] कथितानि यानि ॥ १७ ॥

लग्नाधिनाथे मृतिभावसंस्थे
भौमे क्षिते तस्य च भौमसंस्थे ।
चरांगते वा भृगुजे बुधे वा
शस्त्राभिघातो बहुधापदश्च ॥ १८ ॥ ०

It ends:

तदा फलज्ञानविधौ मुनींद्राः
सविस्मयाः संचकिता महांतः ।
गुर्वेंदुसौम्ये खसुराशिपूज्याः
सोच्चंगताः स्वांशगताश्च वापि ॥ ६९ ॥

लग्ना त्रिकोणाय गता स्वमित्रैर्
दृष्टाश्च युक्ता निजवर्गयुक्ता(!) ।
गजाश्च रत्नांतरदेशलाभं
स्त्रीपत्रलाभं विविधं च सौख्यं ॥ १० ॥
यच्छंति खेटाः परमर्दनं च
कुर्वंति सर्वे बलिनो न संधत्(!) ॥

इति श्रीताजिकमतानुसारं मणित्थग्रंथं स्मासाः ॥

[GAIKAWAR]

3062.

2359a. Foll. 42; size $10\frac{1}{8}$ in. by $4\frac{1}{2}$ in., indifferent Devanāgarī writing of 1753 A.D., 11 or 12 lines in a page.

Tājikakaustubha, an elementary treatise on astrology, by *Bālakṛishna Bhatta*, son of *Yādava Bhaṭṭa*, whose parentage again is traced through *Rāmakṛishna* and *Nārāyaṇa* to *Rāmajit Pandita*, a native of the town of Prakāśā on the northern bank of the river Tāpī (Tapti)

According to a various reading of another MS., the author himself lived at Jambūsaras.

It begins: श्रीगुरुशक्तये नमः ॥

ध्यात्वा तत्सपयःपयःप्रदनिभं विंध्याद्रिसंस्थं महो
यश्चासीत्सकलागमार्थकलनः श्रीरामजित्पण्डितः ।
तद्वंशोद्भवभट्टयादवसुतः श्रीबालकृष्णाभिधः
कुर्वे ताजिककौस्तुभं सुललितं विद्वत्सदाभूषणं ॥ १ ॥

सत्ये विधिः शास्त्रमधात्र तन्मुधा
त्रेतायुगे यन्मुनिबादरायणः ।
यद् द्वापरे वर्गकृतं यथाभवत्
तिष्ये तथा ताजिकशास्त्रजं फलं ॥ २ ॥

स्थूलकालफलदं हि जातकं
तत्र धीर्न वरिवर्त्ति धीमतां ।
ताजिकं विशदमादिताजिकात्
ताजिकज्ञसुखदं वदाम्यतः ॥ ३ ॥

समरसिंहकखिन्न(न्द)करोमक-
प्रभृतिभिर्गदिता बहुताजिकाः ।
य इति ते सुगमा न भवंति मे
स्फुरति धी रचने सुगमस्य वै ॥ ४ ॥

ललितपदपराणां चित्रवृत्तादराणां,
फलविधिचतुराणां कीर्तये [ऽ]दो नराणां ।
विमलमतिविचार्यं पंडितैश्चापि धार्यं
सततमपरिहार्यं बालकृष्णोक्तकार्यं ॥ ५ ॥ °

The following are the divisions that occur: *varshapraveśādi- drishṭisādhanāntādhikāra*, fol. 7a; *dvādaśabhāvādhyāya*, fol. 10a; *sūryādigrahamunthahāphalādhyāya*, fol. 16b, *balādhyāya*, fol. 18b; *varsheśaphalādhyāya*, fol. 20a; *shodaśayogādhyāya*, fol. 24a; *daśāphalādhyāya*, fol. 26b; *antardaśāphalādhyāya*, fol. 30b; *māsabhāvaphalādhyāya*, fol 38a, *māseśaphala*, fol. 39a; *dinacaryāyām tanvādibhāvāmśaphala*, fol. 41a, *bhojyādivicāra*, fol 41b.

It ends:

या ताप्युत्तरतीरसंश्रयवती ख्याता प्रकाशी(°शा Bh.) [पुरी
यश्चासीदिह याज्ञवल्क्यतिलकः श्रीरामजित्पंडितः ।
षट्शास्त्राध्ययनाधिराट् समभवन्नारायणस्तत्सुतस्
तत्सूनुर्नयवेदवित् समभवच्छ्रो रामकृष्णाभिधः ॥ १५ ॥

तदंगजो यादवभट्टनामा
नानागमार्थाकलितो बभूव ।
साहित्यपीयूषसुपोषितांगः
श्रितः प्रकाशो जगति प्रसिद्धः ॥ १६ ॥

इह यादवभट्टजातजन्मा
जनकाम्बुजपटपदस्ततान* ।
स हि ताजिककौस्तुभाभिधानं
कमनीयं भुवि बालकृष्णभट्टः ॥ १७ ॥

श्रीनारायणशंकरस्तवनके स्तोत्रं शिवायास्ततो
यंत्रोद्धारयुतं महागणपतेः स्तोत्रं त्रिवेण्यास्ततः ।
योगिन्यष्टदशाक्रमः प्रतरणेः संक्रांतिजे निर्णयः
पद्यां यस्य विराजते कृतिरियं पांडित्यचिंतामणिः॥ १८॥

एनं नरस्ताजिककौस्तुभं यः
कंठे विदध्यात् सुमनोषिमान्यं ।
सर्वे महीमंडलमंडनाय
भवेन्नरेशाश्वगजाश्वपश्चिः ॥ १९ ॥

---

* कृतजंबूसरसालयस्ततान । Bhand.

नाभ्यर्थंते चंद्रिकायां चकोराश्
चंद्रेणार्थी कल्पपुष्पैर्न भृंगः ।
तद्वत्स्यादस्मिन् गुणोत्कर्षलेशात्
कश्चिन्नूनं पंडिताः संतु सक्ताः (?) ॥ २० ॥
यादृशो मम मतेः परिपाकस्
तन्निदानवशतो ऽयमकारि ।
शोधयंत्विह बुधा यदशुद्धं
प्रार्थना सफलयंतु ममैतां ॥ २१ ॥

इति श्रीभट्टयादवात्मजबालकृष्णभट्टविरचितं ताजिककौस्तुभं संपूर्णतामगमत् संवत् १८१० वर्षे शाके १६७५ मति श्रावणसित १२ शुक्रवासर इति श्रेयःश्रेणी बभूव । लिखितं रामकृष्णेन मुनिना श्रीभीलैडानगरे मेदपाटदेशे श्रीचित्रकूटाचलपार्श्ववर्तिनि ॥

Cf. Bhandarkar, Report 1882-3, pp 33, 218. In Dr. Buhler's Cat. of Gujarāt MSS, iv, p 142, treatises of the same title by *Yādava* and *Rāmakrishṇa* are mentioned besides the present. Perhaps, however, these titles may be due to some mistake, the names of their alleged authors being also those of the father and grandfather of *Bālakrishṇa*, the author of the present treatise. [GAIKAWAR.]

3063.

2359 b. Foll. 26; size 10½ in. by 4¾ in.; fair Devanāgarī writing of 1733 A.D; twelve lines in a page.

Tājikabhūshana, by *Gaṇeśa Gaṇaka*, son of *Dhundhirāja*, and a native of Pārthapura, on the Godāvarī.

It begins:

भक्तैर्भक्तजनस्य यस्य भवति प्रीतिग्रही(प्रती)तिप्रदा
स्नेहो वंशपरंपरापरिगतः सर्वाभिलाषप्रदः ।
सो ऽयं सर्वसुरासुरेंद्रनिकराराध्यस्तु लंबोदरो
धीरो दुर्जनविघ्नतर्जनकरः श्रेयस्करः स्तात्सदा ॥ १ ॥
तूर्णं यत्करुणाकटाक्षकणिका संपूर्णसिद्ध्यै भवेत्
तां वाणीं प्रणिपत्य सत्यनिरतं श्रीढुंढिराजं गुरुं ।
सारं ताजिकवारिधेर्निरवधेः प्रोद्धृत्य पीयूषवत्
कुर्वे ताजिकभूषणं गणपतेर्भक्तो गणेशः सुधीः ॥ २ ॥
गर्गाद्यैर्यवनैश्च रोमकमुखैः सत्यादिभिः कीर्तितं
शास्त्रं ताजिकसंज्ञितं निरवधिं तद्वारिधिं दुस्तरं ।
एतत् ताजिकभूषणं नवतरां तर्तुं समर्था तरिर्
युक्तार्थामलकोमलोक्तिविलसत्कर्णानुकीर्णा भृशं ॥ ३ ॥
ब्रह्मेंद्वपि तुरुष्कसंभवमिदं तार्तीयकं वर्तते
शास्त्रं यद्यपि सद्विजैरपि तथाप्यध्येतुमर्हं भवेत् ।
यस्माद्यत्सदसत्फलं निगदितं सत्यं हि किं पंकजे
शंका पंकभवाथवा फणिफणोत्पन्ने मणौ दूषणं ॥ ४ ॥
धात्रा शास्त्रमकारि यत्कृतयुगे तत्सर्वथा नान्यथा
त्रैनाथामपि बादरायणकृतं तच्चानृतं नाभवत् ।
यत्रर्भेण विनिर्मितं कृतिचमत्काराय तद् द्वापरे
काले ऽपि प्रबले कलेरविकलं तार्तीयकोक्तं फलं ॥५॥
शाको(? के) जन्म शशे(शो)निते भवति यच्छेषं गताब्दव्रजो
ऽधो ऽधः संगुणितः शरैः५श्च युग२लेनाङ्कगै६र्युगै४र्भाजितः ।
लब्धं तज्जननोत्थवारघटिकाद्येनान्वितं सप्तभिः
पूर्वार्कै(के) विहृत ऽत्र शेषकमितो वर्षप्रवेशे भुवः ॥ ६ ॥०

The topics treated in it are *varsheśanirṇayādhyāya*, fol. 4a; *munthahāphalādhyāya*, fol 5a; *varsheśaphalādhyāya*, fol. 6b; *dvādaśabhāvavicārādhyāya*, fol. 12a; *grahabhāvaphalādhyāya*, fol. 17b; *sahamādhyāya*, fol. 19b; *mishṭakādhyāya* (? *miśraka*), fol. 20a; *daśādhyāya*, fol. 22b; *antardaśādhyāya*, fol. 24b, *māsaphalavicāra*, fol. 25b; *bhojanādivicāra*, fol. 26b.

It ends:

श्रीमद्देवगिरीशदेशविलसद्गोदावरीसत्सरित्-
तीरे पार्थपुरं वरं विजयते विश्वंभराविश्रुतं ।
ज्योतिःशास्त्रविचारसारचतुरैर्मत्पूर्वजैः संश्रितं
तेषां पुण्यफलं किलेदममलो मे वाग्विलासो मतः ॥२२॥
श्रीमन्मंगलमूर्तिपादकमलद्वंद्वातिसेवोद्भव:
स्फूर्त्या कोमलवाग्विलासविलसत्पद्यानवद्यैर्भृशं ।
एतत् ताजिकभूषणं सुगणकः प्रीत्यै चकारादराद्
आलोक्यादिकृतीन् (!) गणेशगणकः श्रीढुंढिराजा-
[त्मजः ॥ २३ ॥

इति श्रीढुंढिराजात्मजगणेशकविरचिते ताजिकभूषणे भोजनादिविचारः समाप्तः ॥ ० ॥

Cf. Rāj. Mitra, Bikaner MSS., p. 343, Notices, ii., 20 (from v. 6). [GAIKAWAR.]

b Horoscopy.

3064.

834 a. Foll. 28; size 12¾ in. by 4 in; good Bengalī handwriting of 1806 A D, eight lines in a page.

Bṛihajjātaka, a manual of rules for casting nativities, by *Varāhamihira*, son of *Ādityadāsa*. [A.]

It consists here of the following 25 chapters. 1. *rāśiprabhedādhyāya;* 2 *grahayonibhedādhyāya;* 3. *viyonijanmādhyāya;* 4. *nishekādhyāya* (thus also B. C.); 5. *jātakādhyāya* (*sūtikādhyāya*, B.; *janmavidhir nāmādhyāyah*, C); 6 *sadyomaranādhyāya*, 12 vv. (*arishṭādhyāya*, B., cf. next no.; **वृत्तोऽरिष्टाध्यायः** C., but **सद्योमरणमरिष्टाध्यायः** in summary at the end); 7 *āyurdāyādhyāya;* 8 *daśāpākādhyāya* (A. B.; *daśantardaśādhyāya*, C.; *daśāvibhāga*, in summary), 9. *ashṭakavargādhyāya;* 10. *karmājīvādhyāya;* 11. *rājayogādhyāya;* 12 *nābhasayogādhyāya;* 13. *candrayogādhyāya;* 14 *dvigrahādhyāya;* 15. *pravrajyāyogādhyāya* (A. B. C); 16. *rāśiśīlādhyāya* (**अथ राशिफलं । वृत्तातामदृगुणशाकलघु°** 33 vv. A.; B. C., see next MS.); 17. *drishṭiphalādhyāya;* 18. *bhāvādhyāya;* 19 *āśrayayogādhyāya;* 20. *prakīrnādhyāya;* 21. *anishṭādhyāya* (A. B. C.); 22. *strījātakādhyāya;* 23. *niryāṇādhyāya* (A. B; *nairyāṇādhyāya*, C.); 24. *nashṭajātakādhyāya;* 25. *drekkāṇādhyāya* (*dreshkāṇādhy.* C.).

Then follow 6 additional *ślokas*, the first 4 of which contain a list of the chapters; after which:

> **आदित्यदासतनयस्तदवाप्तबोधः**
> **कापित्थलः(!) सवितृलब्धवरप्रसादः ।**
> **आवन्तिको मुनिमतान्यवलोक्य सम्यक्**
> **होरां वराहमिहिरो रुचिरां चकार ॥**
>
> **पृथु विरचितमन्यैः शास्त्रमेतत्समस्तम्**
> **तदनु लघु मयैतत्तत्प्रवेशार्थमेव ।**
> **कृतमिह हि समस्तं धीविशालैर्मतं चेन्**
> **मम यदिह दुरुक्तं सज्जनैः क्षम्यतां तत् ॥**

See Berl. Cat., no. 857; Oxf. Cat., no 779 The treatise has been variously published in India

[H. T COLEBROOKE.]

3065.

2520 b. Foll 37 (4 of which are wanting; and no. 7 being passed over); size 10½ in by 5 in; legibly written in Devanāgarī, about 1750 A.D; eleven lines in a page.

The same work, imperfect. [B.]

The MS. wants foll. 19, 29–31, and the end of the last chapter after v. 11.

This copy presents some peculiar features *Adhy.* 6. (*a*)*rishṭādhyāya*, 22 vv., is followed by another chapter of 16 vv., beginning:

> **सर्वानिमानतिबलः(!) स्फुरदंशुजालो**
> **लग्नस्थितः प्रशमयत्सुरराजमंत्री ।**
> **एको बहूनि दुरितानि सुदुस्तराणि**
> **भक्त्या प्रयुक्त इव शूलधरे प्रणामः ॥ १ ॥**

with the colophon. **इत्यन्योक्तरिष्टभंगाध्यायः ॥** No notice is taken of these verses in *Bhaṭṭotpala's* commentary.

For *Adhy* 16 of MS A. (33 vv.) this MS. has two chapters, viz. 16. *nakshatrajātakādhyāya*, beg. **प्रियभूषणः सुरूपः°** 14 vv. (which are wanting in A); and 17. *sarvarāśiphalādhyāya*, beg. **वृत्तातामदृगुष्ण°** 33 vv As commented upon by *Utpala*, these two form one chapter of 47 verses (the leaves containing vv. 13–27 being however lost in next MS.), with the title *rāśiśīlādhyāya*. The colophons of the next four chapters are lost; but *adhy.* 21–24 of A. are here counted 22–25.

[GAIKAWAR]

3066.

435. Foll. 158; size 11 in. by 4¼ in.; fair Devanāgarī writing; 11–13 lines in a page.

Brihajjātakavivṛiti, composed, by *Bhaṭṭotpala*, in 966 A.D.; with the text of the original treatise given in full between the commentary. [C.]

The final *ślokas* and colophon being wanting in this MS., the special titles of the commentary, *Jagaccandrikā* and *Cintāmaṇi* (Rāj. Mitra, Not., ii., p. 165), do not occur in it.

It begins:

ब्रह्माजशंकररवींदुकुजज्ञजीव-
शुक्रार्कपुत्रगणनाथगुरून्प्रणम्य ।
यः संग्रहो ऽर्कवरलाभविवृद्धबुद्धेर्
आवंतिकस्य तमहं विवृणोमि कृत्स्नं ॥ १ ॥

यच्छास्त्रं सविता चकार विपुलैः स्कंधैस्त्रिभिर्ज्योतिषं
तस्योच्छित्तिभयात्पुनः कलियुगे संश्रित्य यो भूतलं ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधाद्
इत्थं यं प्रवदंति मोक्षकुशलास्तस्मै नमो भास्वते ॥ २ ॥

वराहमिहिरोदधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयुक्तिरत्नोज्ज्वले ।
भ्रमंति परितो यतो लघुधियो ऽर्थलुब्धास्ततः
करोति विवृतिप्लवं निजधियाहमत्रोत्पलः ॥ ३ ॥

इह शास्त्रे कानि संबंधाभिधेयप्रयोजनानि भवंतीत्युच्यते ॥ वाच्यवाचकलक्षणः संबंधः । वाच्यो ऽर्थो वाचकः शब्दः । ° – – (fol. 2*a*, l. 2) तदयमावंतिकाचार्य(र्यो) वराहमिहिरो मगध(? *r.* नाम) द्विजो ऽर्काल्लब्धवरप्रसादो ज्योतिःशास्त्रसंग्रहकृत्गणित[स्कंधादनंतरं होरा]स्कंधं चिकीर्षुरशेषविघ्नोपशांतये भगवतः सूर्यादात्मगामिनीं वाक्सिद्धिं शार्दूलविक्रीडितेनाह ॥ मूर्तित्वे °

The MS. seems to be derived from two different copies. The first portion, numbered 1–110 (with duplicate leaves for foll. 4, 43, 45, 56; whilst fol. 53 is apparently wanting, and no. 92 passed over in the pagination), was written by different hands in the latter part of last century; foll. 51, 53–58, 60–62, 65–73 being, however, somewhat older and probably forming all that is left of the original MS. of this portion, the lost leaves being afterwards supplied by other hands. The second portion, written uniformly (with the exception of the last leaf) about 1770 A.D., is numbered 120–168; leaving a gap before it of 14 verses (xvi. 13–27 see preceding MS.). The last leaf, numbered 170, containing the colophon only, has been supplied, in 1800 A.D., by a different hand.

The work here consists of 25 *adhyāyas*, and an additional *upasamhārādhyāya*, in the comment on v. 4 of which (प्रश्नास्तिथिभं दिवसः क्षणश्च ° Berl. Cat., no. 857) the last but one leaf of the MS. breaks off.

Adhy. xvi. *rāśiśīlādhyāya*, as here commented upon, consists of 47 verses: प्रियभूषणः °

The chapters end: 1 fol. 13*a*; 2. fol. 24*a*; 3. fol. 27*a*; 4. fol 36*b*; 5. fol. 44*a*, 6 fol. 47*b*; 7. fol. 60*b*; 8. fol. 76*a*; 9. fol. 82*a*; 10. fol. 84*a*; 11. fol. 90*a*; 12. fol. 96*b* (without colophon); 13. fol. 104*a*; 14. fol. 106*a*; 15. fol. 108*b*; 16. fol. 127*b*; 17. fol. 130*b*; 18. fol. 134*b*; 19. fol. 138*a*; 20. fol. 140*a*; 21. fol. 146*a*; 22 fol. 150*b*; 23. fol. 155*b*; 24. fol. 162*b*; 25. fol. 168*a*.

Several editions of this commentary have been published in India. Cf. Aufrecht, Oxf. Cat., no. 780. [H. T. COLEBROOKE.]

3067.

2091c. Foll. 14; size 8½ in. by 5 in.; fair Devanāgarī writing of 1740 A.D.; 9–13 lines in a page.

Laghujātaka (or *Sūkshmajātaka*), another, shorter manual of horoscopy, by *Varāhamihira*; in 13 *adhyāyas*.

It begins: यस्योदयास्तसमये ° Berl. Cat., nos. 858–860.

The text of the work has been published, from the Berlin MSS. (with a German translation), by A. Weber, Ind. Stud., ii., 277 seqq.; and by H. Jacobi, De Astrologiæ indicæ Horā appellatæ originibus (Bonn, 1872). The present MS. contains rather more verses in nearly all chapters.

Dated: संवत् १७९७ वर्षे आशाढशुदि ७ शुक्रे अद्येह नूतनपुरे वास्तव्यश्रीगिरीनारायणभट्टमुकुंदजीतत्सुतप्रभुजीकेन लिखितं ॥ चिरंजीविभाईजीवरा तथा वल्लभजी तथा मोरारजी तथा भवानिपठनार्थं ॥ जामश्रीतमाचीजीविजयराज्ये लेखकपाठकयोः कल्याणं भूयात् ॥ ° [GAIKAWAR.]

3068.

834 d. Foll. 10; size 12¾ in. by 4½ in.; clear, modern Bengalī handwriting; eight lines in a page.

Laghujātaka; resembling more closely the text of the Berlin MS. and of *Bhaṭṭotpala's* commentary. The verses are not numbered in this copy. [H. T. COLEBROOKE.]

3069.

1519 c. Foll. 14; size 10½ in. by 5 in.; good Jaina Devanāgarī writing, of about 1750 A.D.; 26 lines to a full page.

Varāhamihira's Laghujātaka, or *Sūkshmajātaka*, in 13 *adhyāyas*, with *Bhaṭṭotpala's* commentary, *Laghujātaka-vṛitti* (or *ṭīkā*).

The text begins: यस्योदयास्तसमये ° सूर्यः ॥ १ ॥ होराशास्त्रं वृत्तैर्मया ° संप्रवक्ष्यामि ॥ २ ॥ यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिं व्यंजयति ° ॥ ३ ॥

The commentary begins: अथ श्रीलघुजातकज्योतिःशास्त्रं सूत्रवृत्तियुक्तं लिख्यते । यस्योदयास्तमयेति । स सूर्यो जयतु । कीदृशः सूर्यः । धाम्नां निधिः ° — — सुरमहर्षयश्चावश्यमेव कुर्वंतीत्यर्थः ॥ १ ॥ होराशास्त्रं वृत्तैति सुगमार्थः ॥ २ ॥ यदुपचितेति । व्याख्या । यत् शुभाशुभं कर्म अन्यजन्मनि संचितं एतत् होराशास्त्रं तस्य कर्मणः प्राप्तिं व्यंजयति प्रग(r. प्रक)टीकरोति । कस्मिन् काले शुभफलं °

The text of the commentary thus seems to differ considerably from that of the Berlin MS., no. 859.

In the colophons of the *Jātaka*, the latter work itself is throughout ascribed to *Bhaṭṭotpala*. [H. T. COLEBROOKE.]

3070.

2520 c. Foll. 31; size 9¼ in. by 4¼ in.; fairly good, small Devanāgarī writing of 1600 A.D.; 12 or 13 lines in a page.

Laghujātaka, with *Bhaṭṭotpala's* commentary, *Sūkshmajātakavivṛiti*, or *Śishyahitā*.

The commentary seems rather compressed in this copy.

The MS. begins: यस्योदयास्तसमये ° १ ॥ होराशास्त्रं ° २ ॥ सुगमं ॥

होराशास्त्रं व्यंजयति प्रकटीकरोति । कस्मिन्काले शुभफलं । यदुपचितमन्यजन्मनि शुभाशुभं तत्र कर्मणि प्राप्तिं व्यंजयति शास्त्रमेतत् । तमसि द्रव्याणि दीप इव ॥ ३ ॥

Colophon: इति भट्टोत्पलविरचितायां सूक्ष्मजातकविवृतौ शिष्यहिताभिधायां नष्टजातकाध्यायस्त्रयोदशमः ॥ ° [GAIKAWAR.]

3071.

1122 c. Foll. 36; size 11¾ in. by 4 in.; clear Devanāgarī writing of 1799 A.D.; 6–11 lines in a page.

Laghujātaka, with a gloss called *Laghujātakadīpikā* by *Īśvara*, who gives no account of himself. Rather incorrect.

The commentary begins: इह खलु निर्विघ्नपरिसमाप्तिप्रचयपरिपंथिप्रत्यूहनिवहध्वंसार्थमाचार्यैः ° ग्रंथादौ निबध्नाति । यस्येति ॥ सुराणामिंद्रादीनां °

It ends:

लघुजातकभावार्थदीपिका त्वीश्वरोदिता ।
आधानप्रसवारिष्टयोगादीनां प्रकाशिका ॥ १ ॥

इतीश्वरविरचितायां श्रीलघुजातकदीपिकायां नष्टजातकाध्यायः सप्तदशः समाप्तः ॥ लिपितमिदं अग्निहोत्रीशिवदत्तेन ° ॥ [H. T. COLEBROOKE.]

3072.

2295. Foll. 33; size quarto, 13¼ in. by 10 in.; fair Devanāgarī writing of 1813 A.D.; number of lines varying.

The same works; copied from the preceding MS., with corrections by another hand.

[CALCUTTA.]

3073.

2330. Foll. 282; size 11 in. by 5 in.; fairly good, modern Devanāgarī writing; ten lines in a page.

Vṛiddha-Yavanajātaka, or *Mīnarājajātaka*, a comprehensive work on horoscopy and other kinds of prognostication, ascribed to *Mīnarāja Yavanācārya*.

It begins (cp. Aufrecht, Oxf. Cat., no. 781):

सृष्टेर्विधात्रे जगतां शिवाय
संहारकाले स्थितये ऽच्युताय ।
तुभ्यं नमः सर्वगताय नित्यं
त्रयीमयायामलभास्कराय ॥ १ ॥

यदुक्तवान्पूर्वमुनिस्तु शास्त्रं
होरामयं लक्षमितं मयाय ।
तन्मीनराजो निपुणं स्वबुद्ध्या
विचिंत्य चक्रे ऽष्टसहस्रमात्रं ॥ २ ॥

या पूर्वकर्मप्रभवस्य धात्री
धात्रा ललाटे लिखिता प्रशस्तिः ।
तां शास्त्रमेतत्प्रकटं विधत्ते
दीपो यथा वस्तु घनेंधकारे ॥ ३ ॥

आद्यः स्मृतो मेषसमानमूर्तिः
कालस्य मूर्धा गदितः पुराणैः ।
सोऽजाविकासंचरकंदराद्रिस्
तेनाग्निधात्वाकररत्नभूमिः ॥ ४ ॥

वृषाकृतिस्तु प्रथितो द्वितीयः
स वक्त्रकंठायतनं विधातुः ।
वनाद्रिसानुर्द्विपगोकुलानां
कृषीवलानां च विहारभूमी ॥ ५ ॥

वीणागदाभृन्मिथुनस्तृतीयः
प्रजापतेः स्कंधभुजप्रदेशः ।
प्रनर्तको गायनशिल्पिकः स्त्री-
क्रीडारतिद्यूतविहारभूमिः ॥ ६ ॥

कर्की कुलीराकृतिरंबुसंस्थो
वक्षःप्रदेशो विहितश्चतुर्थः ।
केदारवापीपुलिनानि तस्य
देवांगनानां च विहारभूमिः ॥ ७ ॥

सिंहस्तु शैले हृदयप्रदेशः
प्रजापतेः पंचममाहुराद्याः ।
तस्याटवीदुर्गगुहावनाद्रि-
वाद्यावहाभूमिवनप्रदेशाः(?) ॥ ८ ॥

प्रदीपिकां गृह्य करेण कन्या
नौस्था जले षष्ठमिति ब्रुवंति ।
कालाधेधाराजठरं विधातुः
सराड्वलस्त्रीरतिशिल्पभूमिः(?) ॥ ९ ॥

वीथ्यां तुलापण्यधरो मनुष्यः
स्थितः स नाभीकटिवस्तिदेशे ।
भुद्राधेवीणापणपत्तनाय
सर्वाधिवासो नभसस्य भूमिः ॥ १० ॥

श्वभ्रे ऽष्टमो वृश्चिकविग्रहस्तु
प्रोक्तः प्रभोर्मेढ्रगुदप्रदेशः ।
गुहाविलश्वभ्रविसाश्मगुप्ति-
वल्मीककीटाजगरा हि भूमिः ॥ ११ ॥

धन्वी मनुष्यो हयपश्चिमार्धस्
तमाहुरूरूभुवनप्रणेतुः(? ० रूरू भु०) ।
समस्थितव्यस्तसमस्तवाजी-
कृतास्त्रभृद्वज्ररथाश्च भूमिः ॥ १२ ॥

मृगार्धपूर्वो मकरोंबुमध्ये
जानुप्रदेशं तमुशंति धातुः ।
नदीवनारण्यसराज्यभूप-
सभृत्यवासो दशमः प्रदिष्टः ॥ १३ ॥

स्कंधे तु रिक्तः पुरुषस्य कुंभो
जंघोरुमेकादशमाहुराद्याः ।
तस्योदकाधारकुशस्य पक्षी
स्त्रीशौंड(? ० डिक)द्यूतनिवेशदेशाः ॥ १४ ॥

जले तु मीनद्वयमंत्यराशिः
  कालस्य पादौ कथितौ वरिष्ठौ ।
स पुण्यदेवद्विजतीर्थभूमिर्
  नदीसमुद्रांबुधराधिवासः ॥ १५ ॥

इदं जगत्स्थावरजंगमाख्यं
  सर्वं रवींद्वात्मकमाहुराद्याः ।
तस्योद्भवो ऽथापचयश्च दृष्टो
  भूमंडले ऽप्येव तदात्मकं तत् ॥ १६ ॥

तस्याद्यमार्कं विहितं मयादि
  सार्पादिचांद्रं विहितं परार्धं ।
क्रमेण सूर्यः प्रददौ ग्रहाणां
  व्यस्तेन ताराधिपतिस्तथैव ॥ १७ ॥ °

prathamo'dhyāyaḥ, fol. 4*b*; *grahayonibhedādhyāya*, fol. 6*b*; *ādhānādhyāya*, fol. 9*a*; *janmādhyāyaś caturthaḥ*, fol. 10*b*; *āyurdāyādhyāyaḥ pañcamaḥ*, fol. 12*a*; *daśādhyāya*, fol. 14*b*; *antardaśādhyāya*, fol. 19*a*; *raver ashṭakavargaphala*, fol. 21*a*; *candrāshṭakavargaphala*, fol. 22*a*; *bhauma-*, fol. 23*a*; *budha-*, fol. 24*a*; *śukra-*, fol. 26*a*; *śani-*, fol. 27*a*; *sūryadarśanacāraphalāni*, fol. 31*b*; *candradarśanacāra*, fol. 36*a*, etc.; *śukradarśanacāra*, fol. 53*b*; *śanaiścaradarśanacāra*, fol. 58*b*; *sūryacāra*, fol. 69*a*, etc.; *śanaiścaracāra*, fol. 95*a*; *tanusthānacintā*, fol. 100*a*; *dhanasthānacintā*, fol. 101*b*; *sukhasthānacintā*, fol. 105*b*; *sutasthānacintā*, fol. 108*a*; *ripusthānacintā*, fol. 110*a*; *kalatrasthānacintā*, fol. 112*a*; *mṛityusthānacintā*, fol. 113*b*; *dharmasthānacintā*, fol. 115*b*; *karmasthānacintā*, fol. 117*a*; *lābhasthānacintā*, fol. 119*a*; *lagnadarśanacāra*, fol. 121*a*; *anaphāyogādhyāya*, fol. 123*a*; *sunaphāyogādhyāya*, fol. 125*a*; *durdharāyogādhyāya*, fol. 137*a*; *lagnāśrayayogādhyāya*, fol. 146*a*; *dhanāśrayayogādhyāya*, fol. 153*b*; *sahajāśrayayogādhyāya*, fol. 161*b*; *sukhāśrayayogādhyāya*, fol. 169*a*; *sutāśrayayogādhyāya*, fol. 177*a*; *śatrubhāvāśrayayogādhyāya*, fol. 184*b*; *kāmāśrayayogādhyāya*, fol. 192*a*; *dharmāśrayayogādhyāya*, fol. 207*a*; *karmāśrayayogādhyāya*, fol. 214*b*; *lābhāśrayayogādhyāya*, fol. 222*a*; *vyayāśrayayogādhyāya*, fol. 229*b*; *tanubhāvādiphala*, fol. 230*b*; *sutabhāvādhipaphala*, fol. 233*b*, etc.; *dvādaśabhāvasthānacintādhyāya*, fol. 247*b*; *raśmicintādhyāya*, fol. 251*a*; *iti rājayogādhyāyaḥ*; *atha strījātakādhyāyaḥ*, fol. 255*a*; *strījātake lagnaphalam*, fol. 256*a*; *strījātake nakshatraguṇādhyāya*, fol. 259*a*; *sūryaphalam*, fol. 259*b*, etc.; *lagnacārādhyāya*, fol. 269*b*; *mṛityujñānādhyāya*, fol. 272*b*; *anishṭasūcanādhyāya*, fol. 274*b*; *śubhasvapnādhyāya*, fol. 277*a*; *svapnādhyāya*, fol. 279*a*; *kākarutādhyāya*, fol. 281*a*; *svaceshṭitādhyāya*, fol. 282*a*.

It ends :

युग्मं प्रसूतानि युगोपनाशं
  प्राप्नोति धन्ने विषमं तदेव ।
दारेण सार्धं म्रियते यदा वा
  करोति राष्ट्रस्य पुरस्य नाशं ॥ ५ ॥

वत्सान्विता[या] यदि गोः पुरस्तात्
  उक्ता विशेषाच्छुभचेष्टिताश्च ।
यातुर्विधत्ते विजयप्रतापं
  सुवित्तलाभं ह्यरिसंक्षये च ॥ ६ ॥

इति गोविचेष्टितं ॥ इति श्रीयवनेश्वराचार्यविरचितं मीनराजजातकं समाप्तं ॥ श्रीवृद्धयवनजातक संपूर्णं ॥

[GAIKAWAR.]

3074.

2339. Foll. 283; size and writing as above.

The same work, copied from the same MS., by the same hand.

The colophon ends with मीनराजजातकं समाप्तं ॥

[GAIKAWAR.]

3075.

2356. Foll. 83; size 10½ in. by 5 in.; good Devanāgarī writing of about 1700 A.D.; 13 or 14 lines in a page.

Jātakābharaṇa, an astrological work on nativities, by *Ḍhuṇḍhirāja*, son of *daivajña Nṛisiṃha*.

It begins:

> श्रीदं सदाहं हृदयारविंदे
> पादारविंदे वरदस्य वंदे ।
> मंदो ऽपि यस्य स्मरणेन सद्यो
> गीर्वाणवंद्योपमतां समेति ॥ १ ॥
>
> उदारधीमंदरभूधरेण
> प्रमथ्य होरागमसिंधुराजं ।
> श्रीढुंढिराजः कुरुते किलार्याम्
> आर्यासपर्याममलोक्तिरत्नैः ॥ २ ॥ °

It ends:

> गोदावरीतीरविराजमानं
> पार्थाभिधानं पुटभेदनं यत् ।
> सद्गोलविद्यामलकीर्तिभाजां
> मत्पूर्वजानां वसतिस्थलं यत् ॥ १ ॥
> तत्रत्यदैवज्ञनृसिंहसूनुर्गजाननाराधनताभिधानः ।
> श्रीढुंढिराजो रचयांबभूव होरागमेऽनुक्रममादरेण ॥ २ ॥

इति श्रीमद्दैवज्ञढुंढिराजविरचिते जातकाभरणे स्त्रीजातकाध्यायः ॥

> मासवर्यानभसौंद्रतारके चंद्रयोगसहिते हरेर्दिने ।
> व्यासवंशजनितश्च श्रीपतिर्जातकाभरणमालिखच्छुभं ॥

See Berl. Cat., no. 866; Aufrecht, Flor. MSS., no. 292. It was printed at Bombay in 1861.

[GAIKAWAR.]

3076.

998. Foll. 74; size 12½ in. by 4¼ in.; indifferent Devanāgarī writing of about 1750 A.D.; ten lines in a page.

Ḍhuṇḍhirāja's Jātakābharaṇa.

The two verses at the end of the last MS. are here followed by eight more verses, the last four of which contain an *anukramaṇikā*.

[H. T. COLEBROOKE.]

3077.

2839. Foll. 26; size quarto, 6¾ in. by 8½ in.; fair, modern Devanāgarī writing; 22–24 lines in a page

A fragment of the *Jātakābharaṇa*, comprising from fol. 39*a*, l. 9 to fol. 75*a*, l. 9 (75*b*, 4) of MS. 2356. [MACK. COLL.]

3078.

2546. Foll. 87; size 10½ in. by 4¾ in.; fair Devanāgarī writing of 1714 A.D.; fifteen lines in a page.

Ḍhuṇḍhirāja's Jātakābharana, interspersed with extracts from the *Kāmadhenupaddhati*.

It begins: विधिहरीशदिनेशगजानन° see next no.

The text of the *Jātakābharaṇa* begins on fol. 3*a*.

Dated: संवत् १७७१ वर्षे शाके १६३६ प्रवर्तमाने वैशाखवदि४गुरौ नलिनगरे लिखितं (here some words are obliterated). [GAIKAWAR.]

3079.

2457. Foll. 71; size oblong, 9 in. by 5¼ in; fair Devanāgarī writing; 13–17 lines in a page.

Jātaka-kāmadhenu, or *Kāmadhenupaddhati*, a compendium of astrology, especially horoscopy, by *Bhaṭṭa Jayarāma*.

It begins:

> विधिहरीशदिनेशगजाननं
> द्रुहिणजागुरुपादसरोरुहं ।
> सकलशास्त्रविबोधनकारणं
> परमकारुणिकां तुलजां भजे ॥ १ ॥
>
> नानाग्रंथा जातकोत्थाः प्रशस्तास्
> तेभ्यः सारं संगृहीत्वाविशेषात् ।
> कुर्वे ऽहं तां पद्धतिं कामधेनुं
> यस्यां सम्यग् निर्वहः स्यात्फलानां ॥ २ ॥
> संवत्याब्दौ(*r.* °त्सराब्दौ) वैपुवबायनर्तू
> मासाः पक्षौ तिथ्यहर्भानि योगाः ।
> तिथ्यर्धानींदोश्च राशिर्नवांशा
> योनिर्धर्णौ वर्गहंसौ गणश्च ॥ ३ ॥

स्त्रीपुंसोर्भं सूर्यसंक्रांतियातं
योगाः सूर्येंदोस्तथा काललग्ने ।
ज्ञातेराख्या मातृपितृस्वनामा-
न्येवं सद्भिर्जन्मपत्री विधेया ॥ ४ ॥
शालिवाहनजः शाकः पंचविंश१३५समन्वितः ।
ते गताब्दास्तु विज्ञेया राज्याद्विक्रमभूपतेः ॥ ५ ॥
कर्कादिदक्षिणमयनं मकरादुत्तरायनं ।
मेषादावुत्तरो गोलस्तुलादौ दक्षिणः स्मृतः ॥ ६ ॥ ०

इति पंचांगपत्रीलेखनानुक्रमः fol. 1*b*; अथ ग्रहस्पष्टीकरणं fol. 2*a*; अथ भावसाधनं fol. 2*b*, etc. इति श्रीजातकपद्धते(?॰तौ) संवत्सरफलं fol. 7*a*; इत्ययनफलं – मासफलं – पक्षफलं etc पंचांगफलानि fol. 13*b*; इति जातकभावफलाध्यायः fol. 19*a*; इति श्रीजातककामधेनौ ग्रहभावफलाध्यायः fol. 24*a*; इति श्रीकामधेनौ जयरामविरचितपरस्परग्रहदृष्टिफलानि fol. 36*b*; इति रविराशिफलं fol. 37*a*, etc.; शनिराशिफलं fol. 39*b*; इति तनुपतिफलं – धनभावेशफलं – etc. व्ययेशफलं fol. 45*b*; इति द्विग्रहयोगाः – त्रिग्रहयोगाः – etc. अष्टग्रहौ fol. 49*b*; इति कामधेनौ निषेकाध्यायः fol. 50*a*; इति जन्माध्यायः fol. 51*a*; इति ॰ रिष्टाध्यायः fol. 52*a*; इति ॰ रिष्टभंगाध्यायः fol. 53*a*; इति ॰ राजयोगाध्यायः fol. 54*a*; इति राशिस्वरूपं – ग्रहस्वरूपं fol. 55*a*; इति होराफलं – द्रेष्काणफलं etc. त्रिंशांशफलं fol. 56*a*; इत्यष्टकवर्गाः – मैत्रीचक्रं – रविकलानलचक्रं etc. सर्पकलानलचक्रं fol. 57*b*; इति ॰ सामुद्रिकाध्यायः fol. 58*a*; इति राजयोगभंगाध्यायः fol. 58*b*; इति रश्मिफलानि – सामान्यफलं – विशेषफलानि – चंद्रदशाफलं etc. राहोरंतर्दशाफलानि । इति ॰ दशांतर्दशाध्यायः fol. 66*b*; इति॰ नाभसयोगाध्यायः fol. 68*b*; इति॰ निर्याणाध्यायः fol. 70*a*; इति ॰ जातकाध्यायः fol. 70*b*; इति ॰ नष्टजातकाध्यायः fol. 71*a*. Then follow some verses containing a general list of contents.

It ends:

कलिंद्रसंस्थो विजयी गुणाढ्यः
श्रीभासुतो ऽयं जयरामनामा ।
श्रीकामधेनौ जनिजातकस्य
विशेषतस्तद्रचनां चकार ॥ ६ ॥
धनसे(*r.* धनाप्तये) चेदनुभाजनेच्छा
पूर्वार्जितानां सदसत्फलानां ।
ज्ञातुं यदीच्छा नृपसेवनेच्छा
चेदस्ति सत्कामदुघां पठस्व ॥ ७ ॥
अर्थपाकलर्जनूनां सज्जन्मफलतद्विदां ।
दुखानीत्यालये कामधेनुस्थितास्ति(!) क्षा क्षितौ ॥ ८ ॥

इति श्रीकामधेनौ जातके भट्टजयरामनिबद्धं समाप्तम् ॥

अश्वपंचनृपशाकसंमिते
मार्गशिरे सितपंचमी रवौ ।
तद्दिने चमति कामदूधाश्चेत(!)
पूर्णीकृत् च भयरामयथार्थितः(!) ॥ १ ॥
इलंपुरे ब्राह्मणनागरोत्तमः
सत्कर्मधर्मा खलु शास्त्रवेत्ता ।
तस्याभिधं च भयरामवणाशो(!)
संपूर्णीकृत् शास्त्रमिदं सुधीभिः ॥ २ ॥

As Dr. Bühler, Cat. of Gujarāt etc. MSS., iv., p. 118, mentions a MS (*Kāmadhenupaddhati*) dated Samvat 1707, the date (? Śaka 1650) given in the first of these *ślokas* could only refer to the MS., which looks at least as old as that.

Cf. Aufrecht, Flor. S. MSS, no. 281.

[GAIKAWAR.]

3080.

2372 b. Foll. 7; size 11 in. by 5 in.; fair Devanāgarī writing of 1664 A.D., eleven lines in a page.

Jātakamuktāvalīpaddhati, or simply *Muktāvalīpaddhati*, a treatise on nativities, composed, in 1478 A.D., at Brahmapura, on the Tāpī, in Gujarāt, by *Śiva Jyotirvid*, son of *Ḍhuṇḍhi*, and younger brother of *Divākara*.

It begins:

यत्कल्याणपरं पराप्रणमनं विघ्नौघविध्वंसनं
दारिद्र्यैकनिकृंतनं निगदितं ब्रह्मैव यत्तारकं ।
सद्यः पापमपाकरोति च पुनात्युच्चारणादेव यत्
ज्ञानोद्बोधविधायकं विजयते श्रीरामनामामृतं ॥ १ ॥
श्रीढुंढीजनकं नत्वा विलोक्याखिलपद्धतिं ।
मुक्तावलीमहं वच्मि शिवो जातकपद्धतिं ॥ २ ॥
स्फुटो यंत्रादिना जन्मसमयो यस्य वर्तते ।
तस्येयमुपकाराय जायते लघुकर्मयुक् ॥ ३ ॥
शार्दूलविक्रीडितके मदीये करणे ग्रहाः ।
दृगैक्यं यांति तेनान्यैर्वा तान्कुर्यात्सलग्नकान् ॥ ४ ॥ ०

The names of the 7 chapters (*adhyāya*)—viz.: *bhāva, drishṭi, shadbala, ishṭakashṭa, āyurdāya, daśāntadarśa, daśāpraveśasya sādhanam*—show the usual divisions of the subject (cf. Oxf. Cat., no. 794; Ind. Stud., ii., 256).

It ends:

भारद्वाजकुले कलंकरहिते त्रिस्कंधपारंगमः
श्रौतस्मार्त्तविचारसारचतुरः स्वाचारशीलः सुधीः ।
श्रीरामार्चनलब्धधर्मविभवः श्रीढुंढिरस्यात्मजौ
स्यातौ गुर्ज्जरराजसंसदि सुधीमुख्यौ धरामंडनौ ॥ १ ॥

ज्येष्ठस्तत्र दिवाकरस्तदनुजो विद्वान् शिवो दैववित्
वेदार्थावगमाप्तकोट्यमहिमासारः सदाचारवान् ।
तापीतीरपुरे ऽभवत्तदधुना श्रीब्रह्मसंज्ञे शके
पूर्णौ चेंद्रमिते १४०० व्यधायि सुगमा मुक्तावलीपद्धतिः
[॥ २ ॥

इति श्रीदैवज्ञचूडामणिश्रीढुंढीसुतशिवज्योतिर्विद्विरचितायां (?.०तेयं) मुक्तावलीपद्धतिः समाप्ता ॥ सं १७२१ वर्षे शाके १५८६ प्रवर्तमाने माघशु २ रवौ लिखितं ज्योतिर्वित्भटनारायणसुतमुकुंदजीकेन लिखितं । सुतविश्वनाथपुत्रपौत्रपठनार्थं वा स्वयमेव पठनार्थं ॥ [GAIKAWAR.]

3081.

1618. Foll. 6 + 13; size 16 in. by 3¾ in. (folded to half the length); small, modern Bengalī handwriting; 6–10 lines in a page.

Jātakārnava, a treatise on horoscopy, by *Mahādeva Śarman*.

It begins:

प्रणिपत्य शिवं गौरीं श्रीमहादेवशर्मणा ।
बालकानां हितार्थाय जातकार्णव उच्यते ॥

तत्रादौ जातकस्य स्वरूपमाह कल्याणशर्मा । शीर्षोदये मूर्द्ध्ना प्रसवो ऽन्यथोदये चरणैः । उभयोदये हस्तैः शुभं दृष्ट्वा शोभनान्यथा कष्टं । अर्थः । कर्कटवृश्चिकशीर्षोदया वृषमेषपृष्ठोदया मीन उभयदः । वृषमेषधनुःकर्कटमकराः पृष्ठोदयाः । सिंहवृश्चिककुम्भकन्यातुलाः शीर्षोदयाः । मीनमिथुनौ उभयोदयौ । °

Kalyāṇaśarman is again quoted on fol. 2*b*, l. 3.

The MS. seems to contain only the first portion of the work, which runs on without any division—except such as अत्र पितृरिष्टं fol. 3*b*; अथ नष्टकोष्ठीप्रक्रिया ib.; अथ नक्षत्रज्ञानं fol. 4*a*; इति गुरुनक्षत्रानयनं fol. 4*b*; अथ शुभदशानिर्णयः fol. 5*b*; इति स्त्रीणां विशेषफलनिर्णयः fol. 6*a*—to fol. 6*b*, where it ends: अस्याः प्रत्यन्तरमपि अन्तर्देशावत्फलमूहनीयं ॥ after which another hand has added the colophon: इति श्रीमहादेवशर्मणा विरचितजातकार्णवे पञ्चमपरिच्छेदः समाप्तः ॥

The last 13 leaves are taken up with astrological diagrams of various kinds.

[H. T. COLEBROOKE.]

3082.

1162a. Foll. 6; size 13¼ in. by 4¾ in.; fairly good, modern Bengalī handwriting; seven lines in a page.

[*Varāhamirīya*] *Jātakārṇava*, a practical manual of horoscopy.

It begins:

कल्याद्यब्दगणः प्रभाकरहृतश्चैत्राद्यमासैर्युतस्
त्रिस्थः खाद्रि७०हृताप्तयुक् सुर३३हृतो लब्धाधिमासैर्युतः ।
खत्रि३०घ्नः सतिथिर्द्विधा शिव४१युतस्त्रिव्योमशैलो७०द्धृतो
हीनो लब्धदिनावमैः सितनिशार्धे सावनो ऽहर्गणः ॥

The MS contains the following 6 chapters (only the first two of which are numbered): 1. *śīghramadhyādhikāra*, fol. 2*b*; 2. *sphuṭatithyadhikāra*, fol. 4*a*; 3. *chāyādhikāra*, fol. 5*a*; 4. *astodayādhikāra*, fol. 5*b*; 5. *candragrahaṇādhikāra*, fol. 6*a*; 6. *sūryagrahaṇādhikāra*.

It ends: स्पर्शेदखे च कर्तव्यं साहितं समलक्षणं ॥ इति वराहमिहिरीये जातकार्णवे सूर्यग्रहणाधिकारः ॥

Then follow two more verses: स्युः क्रान्तिखण्डानि यमाङ्करामाः ३६२० with the colophon इति क्रान्तिसाधनं ॥ षट्पत्री लिखिता जातकार्णवाख्यस्य केनचित् ॥

The designation '*varāhamihirīya*' only occurs in the one colophon, and seems to indicate merely that the treatise is based on *Varāha-*

mihira's methods. His name is quoted on fol. 5*a*, l. 4, in a passage which seems to show that the fragment described in Aufrecht's Cat. Trin. Coll. Camb., p. 71, belongs to the present work; the chapter there mentioned (*grahasphuṭādhikāra*) being the same as ch. 2 of this MS. It is strange, however, that the beginning of that fragment does not occur in this MS.; but perhaps there is a lacuna somewhere in this MS. (see next no.).

[H. T. Colebrooke.]

3083.

1162b. Foll. 31; size 13¼ in. by 4¾ in.; cursive, modern Bengalī handwriting (different from that of the last MS.); seven lines in a page.

Jātakārṇavaṭīkā, with the special titles *Artharatnaprabhā* and *Arthaprabhāvatī*, a commentary on the preceding work(?), by *Govindānanda Kavikaṅkaṇa* (who perhaps also wrote the original treatise).

It begins rather abruptly: अवमसाङ्गतैर्दिनैर्हीनो ऽपरभागः कार्यः इषो ऽङ्कः सितनिशार्धे भुक्रवारनिशार्धमारभ्य सावनः सूर्योदयसंबन्धी अहर्गणः स्यात् । °

The titles of the chapters (which do not agree with those of the above text) are: 1. *sphuṭādinirṇayo nāma prathamo 'dhyāyaḥ*, fol. 11*b*; 2. *vakrāstanirūpaṇa*, fol. 13*b*; 3. *tripraśnādhyāya*, fol. 20*a*; 4. *khaṇḍādhyāya*, fol. 24*a*; 5. *candrasūryanirṇaya*, fol. 29*b*; 6. *chedakādhyāya*. It would thus seem that this commentary is based on a different version of the text from that contained in the preceding MS. At the beginning of all but the first and third chapters the commentary requires a different text, and as it also does at the end. Thus ch. 5 of the text begins: चक्रशुद्धतमोऽर्काभ्यां योगादस्रो ऽङ्कराशिभिः। ° and the commentary begins: इदानीं चन्द्रसूर्यग्रहणं श्रीमद्वराहमिहिराचार्येणोपेक्षितं रचितं वा देशे ऽस्मिन्न प्रचुरदृष्टं(!) मया परिशिष्य स्वयमेव विविच्यते। आलोच्य सूर्यैरचितं सिद्धान्तं जातकार्णवग्रन्थे परिशिष्यते प्रयत्नाद्गोविन्दानन्दधीमता ग्रहणं। स्पष्टार्थं। अत्र कदा ग्रहणं। भवतीति योगमाह। षष्टाष्टके वाप्यथ सप्तमे वा °

It ends: उपसंहारमाह। देवेति। स्पष्टार्थं ॥

कविकङ्कणेन रचितां श्रीमद्गोविन्दधीमता सुधियः।
अधिगच्छत प्रमोदं सदर्थरत्नप्रभां प्राप्य ॥

इति श्रीगोविन्दानन्दकविकङ्कणाचार्यकृतायां जातकार्णवटीकायामर्थरत्नप्रभायां छेदकाध्यायः षष्ठः ॥ समाप्तेयं जातकार्णवटीका ॥

In the colophons of the other chapters the commentary is called *Arthaprabhāvatī*.

[H. T. Colebrooke.]

3084.

1162c. Foll. 27, size 12½ in. by 4⅜ in.; fair Devanāgarī writing of 1799 A.D.; 9–11 lines in a page.

Jātakacandrikā, a practical manual of horoscopy, without any pretence of scientific method, by *Prāṇadhara Miśra*.

It begins: अथ जन्मपत्रीलिखनक्रमो लिख्यते। पूर्वं गणेशादिदेवानामाशिषः। संवत्शाको चैत्रादिमास अयनं गोलः। ऋतुः दिनगणः। एतस्मिन्मासे पक्षे तिथिवारः। °

आदौ अयनफलं fol. 2*a*; अथ ऋतुफलं ib.; अथ पक्षफलं – तिथिफलं fol. 3*a*; अथ वारफलं fol. 4*a*; अथ नक्षत्रफलं fol. 4*b*; अथ योगफलं fol. 6*a*; इति जन्मराशिफलं। अथ नवांशफलं fol. 9*a*, etc.; इति जातकप्रकरणे नवग्रहारिष्टं संपूर्णं fol. 17*a*; इति जातकचंद्रिका समाप्ता(!) ॥ श्रीरामो जयति ॥ जयति किरणमाली पद्मिनी केलिकारी निशाचरसुखहारी खंडितादुःखकारी। ° fol. 18*b*; अथ रविभावफलं fol. 19*a*, etc.

It ends:

मेषे शशी भूमिसुतो वृषस्थो
भृगुर्युवत्यां वणिजे दिनेशः।
कीटे शशांको मकरभृगुश्च
मीने बुधो नीचग्रहः प्रसिद्धः॥
भृगुभूमिज[जी]वार्केशनिजीवमहीभुजान्।
रविशशिन्दुर्केसौम्यानां मेषाद्याः क्रममंदिरम् ॥

इति श्रीप्राणधरमिश्रेण विरचिता जातकचंद्रिका समाप्ता ॥

[H. T. Colebrooke.]

3085.

216. Foll. 89; size 14½ in. by 5 in.; clear, modern Bengalī handwriting; eight lines in a page.

Jātakadarpaṇa, a compendium of horoscopy, compiled by *Mādhava*.

It begins:

प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरं ।
श्रीमाधवो व्यातनुते यत्नाज्जातकदर्पणं ॥
वराहमिहिरादीनां मतान्यालोक्य विस्तृतं ।
विशेषतः समासेन संक्षिनोमि यथामति ॥
नाधीत्य ये ज्योतिषपुस्तकानि
विवित्सवो जातशुभाशुभं च ।
पश्यन्तु ते जातकदर्पणं मे
भवेद्यतो ऽज्ञानतमोनिरासः ॥

मेष इत्यादिराशयः कथिताः ।
सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगं ।
तदर्कांशो भवेद्राशिर्नवक्षरचनाङ्कितः ॥

राशिनक्षत्रविभागकथनं । क्रियताबुरिजितुमकुलीरलेय-पाथोनजूककौर्प्याख्याः (*Bṛihajjātaka* 1, 8) । °

The end is wanting, one leaf being lost, acc. to a note by Colebrooke's Paṇḍit on fol. 1*a*.

[H. T. Colebrooke.]

3086.

1999. Foll. 8; size 8½ in. by 4 in.; good, modern Devanāgarī writing; eight lines in a page.

Jātakapaddhati, also called *Subodhā*, a manual of horoscopy, in six *adhyāyas* of 42 verses, by *Keśava daivajña* of Nandigrāma.

It begins: नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान् (thus MSS.)° see Berl. Cat., no. 869; Aufrecht, Cat. Trin. Coll. Camb., p. 71; Bhandarkar, Report 1882-83, p. 30. [Dr. John Taylor.]

3087.

2076a. Foll. 13; size 9½ in. by 4¼ in.; fair Devanāgarī writing of 1649 A.D. (?); six lines in a page.

Keśava's Jātakapaddhati.

Dated: अथेह श्रीराजकोटे वास्तव्यपंड्याजोशीश्रीनारायणसुतमुकुंद ℘ केन लिखितं ॥ सु १७०६ वर्षे मार्गशीर्षेशुदि २ रवौ लिखितं ॥ This may have been the date of a former MS. [Gaikawar.]

3088.

1546a. Foll. 6; size 10½ in. by 4⅝ in.; good, modern Devanāgarī writing; nine lines in a page.

The same work, here consisting of 43 verses; the additional verse (द्विस्थो क्षुधिंडो°) being inserted between vv. 8 and 9 of the other copies.

[H. T. Colebrooke.]

3089.

2684b. Foll. 5; small 4to, size 8 in. by 7 in.; modern Telugu writing; nineteen lines in a page.

The same work. [Mack. Coll.]

3090.

2151. Foll. 57; size 11 in. by 5⅝ in.; good, modern Devanāgarī writing; ten lines in a page.

Keśavapaddhatyudāharaṇa, a commentary on *Keśava's* manual, with copious examples, tables, and extracts from other writers; composed, in Saka 1540 (A.D. 1618), by *Viśvanātha*, eldest son of *Divākara*.

It begins:

श्रीगणेशं नमस्कृत्य केशवीनामपद्धतेः ।
गणितं विश्वनाथेन क्रियते बालबुद्धये ॥ १ ॥

नत्वा विघ्नपशारदाच्युतशिवेति । अहं केशवः जातकपद्धतिं कुर्वे। जातस्येदं जातकं। जातस्य बालकस्य जन्मांतरार्जितसदसत्कर्मजनितशुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते । °

See Weber, Berl. Cat., no. 871; and esp. Aufrecht, Oxf. Cat., no. 794, where a list of authorities quoted is given.

Colophon: इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथविरचिते श्रीकेशवदैवज्ञविरचितपद्धत्युदाहरणे दशाध्यायोदाहरणं ॥

गोलग्रामनिवासिभूसुरमणिर्गोदावरीप्रांगणे
दैवज्ञेषु दिवाकराह्वयमहाज्योतिर्विदासीद्बुधः ।
तत्पुत्रोत्तमविश्वनाथरचितं तत्पूर्णमासीज्जनुः-
केशव्या गणितं सुबुद्धिभणितं ज्योतिर्विदां संमतं ॥

गगनवेदशरेंदुमिते ॥ [GAIKAWAR.]

3091.

2076b. Foll. 45; size 9 in. by 5 in.; fairly written in Devanāgarī about 1700 A.D., 13–15 lines in a page.

The same work. Incomplete at the end, the MS. breaking off abruptly in the middle of the page, in the comment on v. 37.

It has also suffered in some parts from the sticky condition of the ink, in consequence of which the writing has in places been torn off one page. [GAIKAWAR.]

3092.

1546b. Foll. 47; size 10½ in. by 4¾ in.; good Devanāgarī writing of 1796 A.D. (by *Jinadatta ṛishi*); fifteen lines in a page.

[*Keśava-*]*paddhatyudāharana*, another, rather more detailed, commentary on *Keśava's* manual, likewise composed (at Benares), in A.D. 1618, by *Viśvanātha*, son of *Divākara* of Golagrāma.

It begins: नत्वेति ॰ अहं केशवो जातकपद्धतिं कुर्वे इत्यन्वयः । जातस्येदं जातकं । यद्यपि इह वृद्धाच्छेति जातीयमिति भाव्यं तथापि नायं शैषिकप्रत्ययांतः किंतु स्वार्थिककप्रत्ययांत एवोपचारात्तदीये वर्तते । गोपस्य स्त्री गोपीत्यादिवत् । स्पष्टं चैतत्पुंयोगादाख्यायामिति सुत्रे कैयटपटादिग्रंथेषु(?) जातस्य बालकस्येदं पूर्वजन्मांतरार्जित[सद]सत्कर्मजनितशुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते ॰ ।

This second commentary would seem to be intended for more advanced students; the other version having been written for beginners (*bālabuddhi*).

It ends: इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते पद्धत्युदाहरणे संतदशाध्यायोदाहरणं ॥

गोलग्रामनिवासिभूसुरमणिर्गोदावरीप्रांगणे
